नाउ[९]कुचि(कि)सरोवरराय**हंसेण** **साहुकुमरसीहेण** परमसाव-

---

१ 'परमड्डी' A.
२ 'सोउण चिंतिअं अइमेयं बिंबं' इति B पुस्तके नास्ति।
३ 'दिट्ठं (ठ्ठं ?)' B.
४ 'विण्णत्ते' A.
५ 'एगं चेव' P.
६ 'भिन्नं दिंता' B.
७ 'वन्नि(त्ति ?)' A.
८ 'तंबयं' A.
९ 'नाउकुच्चि(कि ?)' A. B.

एण पासाओ पुणण्णवो कारिओ। सफलीकयं नायागयं नियवित्त उत्तारिओ अप्पा[1] भवसमुद्दाओ। एवमणेगउद्धारसारं नासिक्क-महातित्थं अज्जवि जत्तामहूसवकरणेण आराहिंति पाउहियाओ आगंतूण सघा पभाविंति कलिकालदप्पनिन्नासणं भयवओ सासणंति।

नासिक्कपुरस्स इमं कप्पं पोराणपरमतित्थस्स।
वायंतपढंताणं संपज्जइ वंछिया रिद्धी॥
किंचि परसमइयमुहा समयपराविउ सुहाउ तह सोउं।
सिरिजिनप[2]हसूरीहिं लिहिओ नासिक्कपुरकप्पो॥

॥ श्रीनासिक्यपुरकल्पः ॥

॥ ग्रंथाग्रं ५८ अ २७ ॥

---

१ ‘अप्पा’ इति B. पुस्तके नास्ति।

२ ‘जिणप्पह’ A.

पणमिअ पासजिणेसं हरिकंखीनयरचेइयनिविट्ठं ।
तस्सेव कप्पमप्पं भणामि निहुणिअकलिदप्पं[१] ॥

गुज्जरधराए हरिकंखी[२]नामो अभिरामो गामो अच्छइ । तत्थ जिणभवणे उत्तुंगसिहरे संनिहिअपाडिहेरा सिरिपासनाह-पडिमा विविहपूआहिं पूइज्जइ भविअजणेणं तिकालं । अन्नया चालुक्कवंसपईव सिरिभीमदेवरज्जे तुरुक्कमंडलाओ आगएण सबलवाहणेण अ तनुवुक्काभिहाणसल्लारेण अणहिल्लवाडय-पट्टणगढं भंजित्ता वलं तेण दिट्ठ हरिकंखीगामे तं चेईयं[३] । मज्झे पविसित्ता भग्गा पासनाहपडिमा । तओ गामं उवद्द-वित्ता चलिओ सट्ठाणं पइसल्लारो । पुणो वसिओ गामो । समा-गया गुट्ठिअसावया भगवंतं भग्गं तं निरूवित्ता परुप्परं[४] भणिउं पवत्ता । अहो भगवओ महामाहप्पस्सावि कहं नाम भंगो विहिओ मिच्छाएहिं । कत्थ पुण सा भगवओ तारिसी कला गयत्ति । तओ तेसिं पसुत्ताणं सुमिणे आइट्ठ(ट्ठं?) अहिट्ठायगसुरेहिं । जहा'एयाए पडिमाए खंडाणि सव्वाणि एगट्ठीकाऊण गब्भहरे ठावित्ता दुवारं कवाडरुद्धं काउं तालयं दाऊण छम्मासं जाव पडिवालेयव्वं[५] । तओ परं दुवारमुग्घाडिय पडिमा निरिक्खियव्वा संपुण्णंगोवंगा ।' गोट्ठिएहिं भोगं काऊण तहेव कयं । जाव पंचमासा वोलीणा छट्ठस्स पारंभे ऊसुगीहोऊण गोट्ठिएहिं वारमुग्घाडियं[६] ।

---

१ 'कप्पमप्पं'.　　२ 'हरिक(कं ?) खी A.
३ 'चेइयं' B.　　४ 'परुप्परं(रं ?)' A. B.
५ 'पडिमालेयव्वं' B.　　६ 'उग्घाडयं' A. B.

जाव दिट्ठा भगवओ संपुण्णंगुवंगकप्पा केवलं ठाणे ठाणे मसनिवहपूरिआ । तओ तत्तम[1]त्तिआ[2]रित्ता तेहिं आइओ सुत्तधारो तेण टंकिआए[3] मसा छिंदिउमारद्धा जाव नीसरिअं मसेहिंतो रुहिरं तओ भीया गुट्ठिआ पूआभोगाइएहिं पसाएउमारद्धा । तओ रत्तीए सुमिणे आइट्ठमहिट्ठायगेहिं । जहा-'न सोहणं कयं तुम्हेहिं[4] । जओ अपु[5]ण्णा ए वि छम्मासीए दुआरमुग्घाडिअं । पुणो वि टंकिआ वाहाविआ । संपयं पि ढु(ढ ?)क्के[6] मह दुवारं जाव चरमो मासो समप्पइ' । तेहिं तहेव विहिए छम्मासाणंतरं उग्घाडिअम्मि दारे दिट्ठा पाससामिस्स पडिमा । निरुवहयअखंडअंगुवंगा । केवलं नहसुत्तीसु अंगुट्ठे य मणागं तुच्छा । पइट्ठा य गुट्ठिया पुव्वं व पूइउं पवत्ता । आगच्छंति चाउद्दिसाओ संघा । करिंति जत्तामहूसवं । एवं चमुक्कारकारिमाहप्पनिही सिरिपासनाहो ।

इय हरिकंखीनयरे परिट्ठिअस्सासचेणत[7]म(ण)यस्स ।
सिरिजिणपह[8]सूरीहिं कप्पो विहिओ समासेणं ॥

॥ इति हरिकंखीनगरस्थितवमतेः श्रीपार्श्वनाथस्य कल्पः ॥

॥ ग्रं २५ ॥

---

१ 'उत्तम' B. २ 'वियारित्ता' A. B.
३ 'कियाए' B. ४ 'तुम्हेणिं(हिं) A.
५ 'पुसाएवि' B. ६ ''पि ढुक्के' A.
७ 'तसायस्स' A. B. ८ 'जिणप्पह' A.

विरिसत्तुंजयसिहरे परिट्ठिअं पणमिऊण रिसहजिणं।
तस्से वयस्स वुच्छं[1] कवड्डिजक्खस्स[2] कप्पमहं ॥

अत्थि बालक्कजणवए पालित्ताणयं नाम नयरं। तत्थ कवड्डि[3]नामधिज्जो गाममहत्तरो। सो अ मज्जमं[4]समज्जीवघाय-अलिय[5]वयणपरधणहरणपर[6]रमणीरमणाइपविट्ठाणपसत्तचित्तो अणुहीनामियाए अणुव्विट्टियाए भज्जाए सह विसए उव-भुंजंतो गमेइ कालं। अन्नया तस्स मंचयट्टिअ(य?)स्स[7] साहुजुअलं घरे पत्तं। तेणावि दिट्ठिपणामं काउं विन्नत्तं ओडि[8]-अकरेण। भयवं! किमित्थागमणकारणं[9] तुम्हाणं। अम्ह घरे दुद्धदहिघयतक्काइपउरमत्थि। जेण कज्जं तं आइसह। साहुहिं भणिअं। न अम्हे भिक्खट्ठमागया किंतु अम्ह गुरुणो सपरिवारा सित्तुंजजत्ताए आगया। संपयं पुण वासारत्तो पत्तो साहुणं विहरिउं न कप्पइ। अओ तुम्ह[10] पा[से?]उ वस्सयं मग्गिउमागया। जत्थ सूरिणो सपरिवारा चिट्ठंति। मयहरेण विन्नत्तं दिन्नो मए उवस्सओ। आगच्छंतु[11]

१ 'वुच्छं' B.
२ 'कवड्डिजक्खस्स' A. B.
३ 'कवड्डि' B.
४ 'मज्जमंसु' A.
५ 'अलिअ' B.
६ 'परमरमणी' B.
७ 'ट्ठियस्स' A. B.
८ 'ओडिय' B.
९ 'इत्थागमकारणं' A.
१० 'पासे उवस्सयं' A. 'पाओ (उ?)वस्सयं' B.
११ 'आगच्छंत'

सूरिणो चिट्ठंतु अ(उ?)वासए । केवल(लं?) अम्हाणं पावनिरयाणं धम्मोवएसो न दायव्वोत्ति । साहूहिं भणिअं एवं होउत्ति । तओ आगया गुरुणो ठिया वासावउआसिं । कुणंति संतयं मज्झायं । सोमंति छट्ठट्ठमाईहिं नियतणुं । कमेण अइक्कंते वासारत्ते पारणए सुक्कलाविंति मयहरं गुरुणो । सो तेसिं सच्चपइस[1]त्तणओ परितुट्ठो नियनयरसीमसंधिं जाव वोलाविउं पट्ठिओ । पच्छाए सीमसंधीए सूरीहिं जंपिअं । भो मेहर ! तए[2] अम्हाणं उवस्सयदाणाइणा बहुउवयारो कओ । अओ संपइ किंवि धम्मोवएसं देमो जेण पच्चुवयारो कओ हवइ । मेहरेण भणिअं नियमो न ताव मह निव्वहइ किंचि मंतक्खर उवइसह । तओ सूरीहिं अणुकंपाए पंचपरमिट्ठिनवकारमहामंतो सिक्खाविओ । जलजलणथंभणाइ[3]-पभावो अ तस्स उववन्निओ[4] । पुणो गुरूहिं भणिअं पइदिअहं सित्तुञ्जदिसाए होऊण तुमए पणामो कायव्वो । मेहरेण तहत्ति पडिवज्जिऊण गुरुणो पणमिऊण नियघरे आगयं । सूरिणो अन्नत्थ विहरिआ । कमेण तं पंचपरमिट्ठिमंतं जविंतो[5] नियमं च निव्वाहिंतो कालं अइवाहेइ । अन्नया निअघरिणीए कलहं काऊण गेहाओ नीसारिओ । आइण्णुं(उं?) लग्गो

१ 'पच्चपइस्स' B. २ 'हरत अम्हाणं' B.
३ 'थंभणाई' A. B. ४ 'उव(व?)वन्निओ'
५ 'जविं(विं?)तो' A.

सित्तुञ्जगिरिसिहरं । जाव मज्जभरियं भायणं करे धरित्ता वडरुक्खच्छायाए मज्जपाणं करिउकामो उवविट्ठो ताव गिज्झ-मुहकुहरट्ठियअहिगरलबिंदू मज्जपाणे पडिओ दिट्ठो । तं दट्ठूण विरत्तमणो मज्जं निअसेइ । भवविरत्तो अ अणसणं काऊण तक्खणं **आइजिणिंद**चलणकमलं नवकारं च संभरंतो सुहज्झ(ज्झा)णेण मरणं संपत्तो । तित्थमाहप्पेणं नवक्का[1]रप्पभावेण च **कवडि(ड्डि?)**जि(ज?)क्खो उप्पन्नो । ओहि[2]नाणेण पुव्वभवं संभरिअ **आइजिणिंदं** अच्चेइ । सा [3]य तस्स गेहिणी तव्वइयरं सुणित्ता तत्थ आगंतूण अप्पाणं निंदंती अणसणं करित्ता[4] जिणिंदं सुमिरंती कालधम्ममुवगया । जाया तस्सेव करिवरत्तेण वाहणं । **कवडि(ड्डि?)**जक्खस्स चउसु भुअदंडेसु कमेण पासकुस दविणवासणिआबीयपूराइं[5] चिट्ठंति । पुणो सो ओहिणा आभोएऊण पुव्वभवगुरूणं पाय[6]मूले पत्तो । वंदित्ता जोडि[7]यकरयलो विन्नवेइ भयवं ? तुम्ह पसाएण एरिसा मए रिद्धी लद्धा । संपयं मह किंचि किच्चमाइसह । गुरुणा जंपियं[8] इत्थ तित्थे निच्चं तुमए ठाएयव्वं । तिक्कालं[9] **जुगाइनाहो** अंचिअव्वो ।

---

१ 'नवकार' A. B. २ 'उ(ओ ?)हिन्ना(ना ?)णेन' B.
३ 'सावय' B. ४ 'का(क ?)रित्ता' A.
५ 'पूराइ(इं ?) A. B. ६ 'पा[य ?]मूले' A. B.
७ 'जोडिअ' B. ८ 'जंपिअं' B.
९ 'तिकालं' B.

जत्तागयभवियजणाणं मणवंछिअफलं पूरेयव्वं[1]। सयलसंघस्स विग्घा अवहरिअव्वा। तओ गुरूणं पाए वंदिअ तहत्ति पडिवज्जिय[2] गओ अक्खाडिओ विमलगिरिसिहरं। करेइ जहागुरूवइट्ठं।

इअ अंबादेवीए कव[3]ड्डिजक्खस्स जक्खरायस्स।
लिहिअमिणं कप्पजुगं जिनपह[4]सूरीहिं वुड्ढवयणाओ॥

॥ कपर्द्दियक्षकल्पः॥

॥ ग्रं. ४२ ॥

---

१ 'पूरेअव्वं' B. २ 'पडिवज्जिअ' B.
३ 'कवड्डि' A. ४ 'जिणप्पह' A.

पुव्विं किर अवज्झाए नयरीए दसरहनंदणो सिरिपउमा भिहाणो अट्ठमो बलदेवो परमसम्मद्दिट्ठी[1] अणेगसो दिट्ठपच्चयं अणो(णे ?)गविग्घावहारिणिं[2] अणागयजिणिंदस्स सिरिपास-नाहस्स रयणमइं पडिमं निम्मइवयावसरे चिरकालं पूइत्था । कालक्कमेण पुव्वदेसे पउमागरा अपउमाइच्चाइनाएण धम्म-पवित्तिं दूसमसमए तुच्छयरिं भाविणं नाऊण अहिट्ठायगदेवयाहिं गयणमग्गेण सत्तसयदेसे सुद्धदंतीनयरे आणेऊणं भूमिहरए धारिया सा । कालविसमत्तं जाणित्ता रयणमयत्तमवणेऊण पाहाणमई य सा पडिमा विहिया । बऊत[3]रकाल्लाइक्कमे सोधति-वालगच्छे विमलसूरिणो नाम आयरिआ अहेसि(सिं ?) । तेसिं रत्तीए सुमिणे आएसो जाओ । जहा—'इत्थ सिरिपास-सामिपडिमा असुगपएसे भूमिहरट्ठि[4]या चिट्ठइ तं कड्ढेऊण पूआवेहित्ति' । तओ तेहिं[5] सावयसंघस्स आइट्ठं । तेण भूमि-हराओ बाहि नीणिया सा पडिमा । चेइ(ई ?)हरं च कारिअं । ठविआ तत्थ । पूइउ[6]माढत्ता तिक्कालं[7] । कालवसेण उव्वसी-भूआए नयरीए एगया अहिट्ठायगाणं पमत्तत्तणेण तत्थ पसंगागयतुरुक्केहिं भगवओ पासनाहस्स पडिमा दिट्ठा । अणज्जचरिएहिं मत्थयं उत्तारित्ता धरणीए पाडियं ते

१ 'दिट्ठी' A. २ 'विग्घावि(व ?)हारिणिं' B.
३ 'बऊत्त(त ?)र' ४ 'भूमिहरट्ठिआ' B.
५ 'तेसिं' B. ६ 'इपू(पूइ)उ' B.
७ 'तिकालं' B.

गया। तओ ठाओए चारिंतेण तत्थागएण एगेण अथावासेणं तं देवस्स मत्थयं भूमीए पडिअं दट्ठुं बळ[1] सोहत्ता सामि-सरीरस्स उवरिं चडावियं। लग्गं च सलिसंधिरहियं। तं देवयाणुभावेण अज्ज वि तहेव चिट्ठइ पूआरूढं च।

इय सुद्धदंतिनयरट्ठियस्स सिरिपासनाहदेवस्स।
सिरिजिणपह[2]सूरीहिं जहासुअं वण्णिओ कप्पो॥

॥इति दन्तिदन्तच्छेदशुद्धयग्रसः श्रीशुद्धदन्तीपार्श्व[3]-नाथस्य कल्पः॥

॥ ग्रं. १८ ॥

---

१ 'बढुं(ऊ?)' B. २ 'जिणप्पह' A.

३ 'पार्श्वनाथकल्पः' A.

अवन्तिषु प्रसिद्धस्य सिद्धक्षेत्रतरायतेः।
अभिनन्दनदेवस्य कल्पं जल्पामि लेशतः॥ १॥

इह किलेक्ष्वाकुवंशमुक्तामणेः श्रीसंवरराजसूनोः सिद्धार्थाकुक्षिसरसीराजहंसस्य कपिलाञ्छनस्य चामीकररुचेः स्वजन्मपवित्रितश्रीकोशलापुरस्य सार्द्धधनुःशतत्रितयोच्छ्रायकायस्य चतुर्थतीर्थेश्वरस्य श्रीमदभिनन्दनदेवस्य चैत्यं मालवदेशान्तर्वर्त्तिमङ्गलपुरप्रत्यासन्नायां महाटवीगतायां मेदपल्यामासीत् तस्यां च विचित्रपापकर्मनिर्माणक[1]र्मठतासा(था ?)मजातनिर्वेदा मेदाः प्रतिवसन्ति स्म। अन्यदा तुच्छम्लेच्छसैन्येन तत्राप(ग ?)त्य भग्नं तज्जिनायतनम्। नवखण्डीकृतं च प्रमद्वरतयाधिष्ठायकानां का(क)लि[2]कालदुर्ललितानामकमनीयतया प्रतिहतप्रणतजनडिम्बमपि तच्चैत्यालंकारभूतं भगवतोऽभिनन्दनदेवस्य बिंबम्[3]। केचित्तत्र खण्डानीत्याहुः। तानि च शकलानि संजातमनःखेदैर्मेदैः संमील्य एकत्र प्रदेशे धारितानि। एवं बंहीयसि[4] गतवत्यनेहसि हरहसितगुणग्रामाभिरामात्[5] धाराउग्रामादुपेत्य नित्यं वणिगेकः स्वकलाञ्छको वहजाभिख्यस्तत्र क्रयाक्रयिकारूपां वणिज्यामकार्षीत्। स च परमार्हतस्ततः प्रत्यहं गटहमागत्य

१ 'कर्म्मनिर्म्मततायां (?) B. २ 'का(क ?)लिकाल' A. B.
३ 'बिम्ब(म्बं ?)' B. ४ 'एवं[बं ?]हीयसि' B.
५ 'ग्रामाभिरामा[त् ?]' A. B.

देवमपूपुजत्[1]। स चाकृतायां देवपूजायां न जातु बुभुजे। ततः पल्लीमुपेयिवानेकदानेकदारुणकर्मभिस्तैरभिदधे स आहुः। किमर्थमन्वहमेह्रिरेयाश्चिरां(?) कुरुषे ? अस्यामेव पल्ल्यां वणि-गुपचितभोज्यपूरणकल्पवल्ल्यां[2] किं न भुङ्क्षे[3]। ततश्च भणितं वणिजा। भो राजन्याः ? यावदहमर्हतं(न्तं ?) देवाधिदेवं त्रिभुवन-कृतसेवं न पश्यामि न पूजयामि च तावन्न वल्भायां प्रगल्भे। किरातैर्जगदे। यद्येवं देवं प्रति तव निश्चयस्तदा तुभ्यं दर्शयामस्त्वदभिमतं दैवतम्। वणिजा प्रोचे तथास्तु। तत-स्तैस्तानि नवापि सप्तापि वा खण्डानि यथावयवन्यासं संयोज्य[4] दर्शितं भगवतोऽभिनन्दनस्य बिम्बम्। तच्च प्रगुणितरमणीय-पाषाणघटितं विलोक्य प्रमुदितमुदितवासनातिशयेन तेन वणि-ग(ग्व ?)रेण ऋजु[5]मनसा नमस्कृतस्तिरस्कृतदुरन्तदुरितो भगवान्। पूजितश्च पुष्पादिभिः चैत्यवन्दना च विरचिता। ततः स तत्रैव भोजनमकुरुत गुरुतराभिग्रहः। इत्थकारं प्रतिदिनं जिनपूजानिष्ठामनुतिष्ठति सति तस्मिन् वणिजि, अपरेद्युरुदग्र-विवेकातिरेकवञ्चितैर्नाहलैस्तस्मात्किमपि द्रूय धनायद्भिस्तद्बिम्ब-शकलानि युतकीकृत्य क्वचिदपि संगोप्य धृतम्। यावत् पूजावसरे तां प्रतिमामनालोक्य नासौ बुभुजे। ततस्तेन विषण्णमनसा

---

१ 'अपूपुजन्(त् ?)' A. २ 'पल्ली पल्लौ(?)'।
३ 'भुंक्ष्वे(ङ्क्षे ?)' A. B. ४ 'न्यासं[सं ?]योज्य' A. B.
५ 'स(ऋ ?)जुमनसा' A.

विहितमपानकमुपवासत्रयम्। अथ स मेदैरपृच्छि किमर्थं नाश्नासि[1]?। स यथातथमचकथत्। ततः किरातज्ञातैरवादि य-द्यस्मभ्यं गुडं ददासि तदा तुभ्यं दर्शयामस्तं देवम्। वणिजा बभणे वितरिष्याम्यवश्यमिति। ततस्तैस्तत्सकलमपि शकलानां नवकं सप्तकं वा प्राक्तत्संयोज्य प्रकटीकृतम्। दृष्टं च तेन संयोज्यमानं तद्बिम्बम्। सुतरां विषादनिषादसंस्पर्शकलुषित-हृदयः समजनि स श्राद्धधुरीणः। तदनु साक्षि(क्वि?)कतयाभि-ग्रहमग्रहीद् यावदिदं बिम्बमखण्डं न विलोकये तावन्नौदन मश्नीति। 'तस्येत्थमनुदिवसमुपवसतस्तद्बिम्बाधिष्ठायकैः स्वप्ने निजगदे—'यदस्य बिम्बस्य नवखण्डसन्धयश्चन्दनलेपेन पूरणी-यास्तत इदमखण्डतामेष्यतीति।' प्रबुद्धेन तेन प्रातर्जातप्रमो-देन तथैव चक्रे। समपादि भगवानखण्डवपुः। संधयस्तु मिलिताश्चन्दनलेपमात्रेण। क्षणमात्रेण भगवन्तं विशुद्धश्रद्धया संपूज्य भुक्तवान् पण्याजीवः पीवरां मुद[3]मुद्वहन् ददौ च गुडादि मेदेभ्यः। तदनन्तरं तेन वणिजा मणिजातमिव प्राप्य प्रहृष्टेन शून्यखेटके पिप्पलतरोस्तले वेदिकाबन्धं विधाय सा प्रतिमा मण्डिता। ततः प्रभृति श्रावकसङ्घाश्चातुर्वर्ण्यलोका-

---

१ 'नाश्नाति(सि?)' A. B. २ 'अनुदि[व?]स' B.

३ 'मुदम्' इति B. पुस्तके नास्ति।

श्चतुर्दिगन्तादागत्य[1] यात्रोत्सवं सूचयितुं[2] प्रवृत्तास्तत्र अभय-कीर्तिभानुकीर्तिआंबाराजकुलास्तत्रमपठ(ठप?)त्याचार्या[3]-श्चैत्यचिन्तां कुर्वते। अथ प्राग्वाटवंशावतंसेन श्रेष्ठात्मजेन साधु-हालाकेन निरपत्येन पुत्रार्थिना विरचितमुपयाचितकम्—'यदि मम सू[4]नुर्जनिता तदात्र चैत्यं कारयिष्यामीति।' क्रमेणाधि-ष्ठायकचिद्गसाक्षिध्यत: पुत्रस्तस्योदपद्यत कामदेवाख्य:। तत-श्चैत्यमुच्चैस्तरशिखरमचीकरत्साधुहालाक:। क्रमात्साधुभावडस्य दुहितरं परिणायित: कामदेव:। पित्रापि डाहाग्रामादाहूय मलयसिंहादयो देवार्चका: स्थापिता:। मदशाया भिख्यो मेदु:(द:?) स्वाङ्गुली भगवदुद्देशेन कृत्तवान्। किलाहमस्य भगवतोऽङ्गुलीवर्द्धित: सेवक इति। भगवद्विलेपनचन्दनलगनाच्च तस्याङ्गुलि: पुनर्नवीबभूव। तमतिशयमतिशायिनं निशम्य श्रीजयसिंहदेवो मालवेश्वर: स्फुरद्भ[5]क्तिप्राग्भा[6]रभास्वरान्त:-करण[:?]स्वामिनं स्वयमपूपुजत्। देवपूजार्थं चतुर्विंशतिहलकृष्यां भूमिमदत्त मठपतिभ्य:। द्वादशहलवाह्य[7](ह्यां?) चावनीं

---

१ 'आगत्या(त्य?)' B. २ 'सूचयितु(तुं?)' B.

३ 'मपठ(मठप?)त्याचार्या:' A., 'मठपत्याचार्या:' B.

४ 'म[म?]सूनु:' A. ५ 'स्फुरद्भि(द्भ?)क्ति' B.

६ 'प्राग्भार' इति T. B. पुस्तकयोर्नास्ति।

७ 'हल[वाह्यां?]' B.

देवार्चकेभ्यः प्रददाववन्तिपतिः[1] । अद्यापि दिग्मण्डलव्यापिप्रभाव वैभवो भगवानभिनन्दनदेवस्तत्र तथैव पूज्यमानोऽस्ति ।

[2]अभिनन्दनदेवस्य कल्प एष यथाश्रुतम् ।
अल्पीयान् रचयांचक्रे श्रीजिनप्रभसूरिभिः ॥

॥ इति सकलभुवलयनिवासिलोकाभिनन्दनस्य
श्रीअभिनन्दनदेवस्य कल्पः ॥

॥ ग्रं. ५३ अ. १८ ॥

---

१ 'अवन्त(न्ति ?)पतिः' A. B.

२ 'श्रीअभिनन्दनदेव' A. अभिनन्दनदेव B.

श्री[1]सुव्रतं जिनं नत्वा प्रतिष्ठां प्रापुषः क्षितौ ।
प्रतिष्ठानपुरस्याभिदध्मः कल्पं यथाश्रुतम् ॥ १ ॥

इह भारते वर्षे दक्षिणखण्डे महाराष्ट्रदेशावतंसं श्रीमत्प्रतिष्ठानं नाम पत्तनं विद्यते । तच्च निजभूत्याभिभूत-पुरुहूतपुरमपि[2] कालान्तरेण क्षुल्लकग्रामप्रायमजनिष्ट । तत्र चैकदा द्वौ वैदेशिकद्विजौ समागत्य विधवया स्वस्रा साकं कस्यचित् कुम्भकारस्य शालायां तस्थिवांसौ कणवृत्तिं विधाय कणान् स्वसुरुपनीय तत्कृताहारपाकेन समयां (या ?) कुरुतः स्म । अन्येद्युः सा तयोर्विप्रयोः स्वसा जलाहरणाय गोदावरीं गता । तस्याश्च रूपमप्रतिरूपं निरूप्य स्मरपरवशोऽन्तर्ह्रद[3]वासी शेषो नाम नागराजो ह्रदान्निर्गत्य विहितमनुष्यवपुस्तया सह बला-दपि सम्भोगकेलिमकल[4]यत् । भवितव्यताविलसितेन तस्याः सप्तधातुरहितस्यापि तस्य दिव्यशक्त्या शुक्रपुद्गलसंचाराद्गर्भाधान-मभवत् । स्वनामधेयं प्रका[5]श्य 'व्यसनसङ्कटे मां स्मरे'रित्यभिधाय च नागराजः पातालोकमगमत् । सा च स्वगृहं प्रत्यगच्छत् । व्रीडापीडिततया च स्वभ्रात्रोस्त वृत्तान्तं न खलु न्यवेदयत् । कालक्रमेण सोदर्याभ्यां गर्भलिङ्गानि वीक्ष्य सा जातगर्भेत्य-

१ 'श्रीसुव्रतजिनं' A. B. २ 'पु(पु ?)रुहूत' A.
३ 'अन्तह्र(र्ह्र)द' A. B. ४ 'अकलयत(त् ?)' A.
५ 'प्रा(प्र ?)काश्यं(श्य ?)' A.

लक्ष्यत । ज्यायसस्तु मनसि शङ्का जाता ‘ यदियं खलु कनीयसोप-
भुक्तेति ।’ शङ्कनीयान्तराभावाद्यवीयसा(सो ?)पि चेति(त ?)सि
समजनि विकल्पो ‘नूनमेषा ज्यायसा सह विनष्टशीले’त्येवं
मिथः कलुषिताशयौ विहाय तामेकाकिनीं पृथक् पृथक्(ग्)-
देशान्तरमयासिष्टाम । सापि प्रवर्द्धमानगर्भा परमन्दिरेषु
कर्माणि निर्मिमाणा प्राणवृत्तिमकरोत् । क्रमेण पूर्णेऽनेहसि
सर्वलक्षणलक्षिताङ्गं प्रासूत सूनुम् । स च क्रमाद्वपुषा गुणैश्च
वर्द्धमान. सवयोभिरमा रममाणो बालक्रीडया स्वयं भूपतीभूय
तेभ्यो वाहनानि करितुरगरथादीनि कृत्रिमाणि दत्तवानिति
सनोतेर्दानार्थत्वाल्लोकैः सातवाहन इति व्यपदेशं लम्भितः ।
स्वजनन्या पाल्यमानः सुखमवास्थित । इतश्चोज्जयिन्यां श्रीविक्र-
मादित्यस्यावन्तिनरेशितुः सदसि कश्चिन्नैमित्तिक. सातवाहनं
प्रतिष्ठानपत्तने भाविनं नरेन्द्रमादिक्षत् । अथैतस्यामेव पुर्या-
मेकः स्थविरविप्रः स्वायुर[1]वसानमवसाय चतुरः स्वतनयानाहूय
प्रोक्तवान् । यथा वत्साः ! मयि पु(प ?)[2]रेयुषि मदीयशय्यो-
च्छीर्षकदक्षिणपादादारभ्य चतुर्णामपि पादानामधो वर्तमानं
निधिकलशचतुष्टयं युष्माभिर्यथाज्येष्ठं विभज्य ग्राह्यम् । येन भवतां
निर्वाहः संपनीपद्यते । पुत्रैस्तु तथेत्यादेशः स्वीचक्रे पितुः ।
तस्मिन्नुपरते तस्यौर्द्धदे[3](दे ?)हिकं कृत्वा त्रयोदशेऽहनि भुवं खात्वा

---

१ ‘ स्वायु[रवसानम ?]रवसाय ’ B.

२ ‘ पु(प ?)रे ’ A. B.

३ ‘ तो(नै ?)र्द्ध देहिकं ’ A. B.

यथायथं चतुरोऽपि निधिकलशांस्ते जगृहिरे। यावद् द्वाक्ष निभालयन्ति तावत् प्रथमस्य कुम्भे कनक, द्वैतीयी[1]कस्य कृष्ण-मृत्स्ना, तृतीयस्य बुस, तुरीयस्य चास्थीनि ददृशिरे। तदनु ज्यायसा साकं इतरे त्रयो विवदन्ते स्म। यदस्मभ्यमपि विभज्य कनकं वितरेति। तस्मिंश्चावि[2]तरति सति तेऽवन्ति-पतेर्धर्माधिकरणमुपास्थिषत। तत्रापि न तेषां वादनिर्णयः समपादि। ततश्चत्वारोऽपि ते **महाराष्ट्र**जनपदमुपानंसिषुः। **सातवाहन**कुमारस्तु कुलालसद्‌मा हस्त्यश्वरथसुभटानन्वहं नव-नवान् विदधानः कुलालशालायां बालक्रीडादुर्ललित कलित-स्थितिरनयत्समयम्। ते च द्विजतनुजाः **प्रतिष्ठानपत्तन**मुपेत्य परितस्तस्यामेव चक्रजीवनशालाया(यां?) तस्थिवांसः। **सातवाहन**-कुमारस्तु तानवेक्ष्येङ्गिता[3]कारकुशलः प्रोवाच। भो विप्राः! किं भवन्तो चौचा[4]पन्ना इव वीक्ष्यन्ते। तैस्तु जगदे जगदेकसुभग! कथमिव वयं चिन्ताचान्तचेतसस्त्वयाज्ञासिष्महि। कुमारेण बभणे(णि?)-इङ्गितैः किमिव नावगम्यते। तैरुक्तं युक्तमेतत् परं भवतः पुरो निवेदितेन चिन्ताहेतुना किं स्याद्बालः खलु भवान्। बाल आलपत्। यदि परं आतु मत्तोऽपि साध्य वः सिद्ध्यति तन्निवेद्यतां स चिन्ताहेतुः। ततस्ते तद्वचनवैचित्री-

---

१ 'द्वे(द्वै)तीयकस्य' A. २ 'तस्मिंश्चावितरति' इति B. पुस्तके नास्ति।

३ 'इङ्गि[ता?]कार' A. B. ४ 'चौच्या(च्चा?)' A. B.

ह(श्च?)तदृयाः सकलमपि स्वस्वरूपं निधिनिरय[1]णादि मालवेश[2]-परिषद्यपि विवादनिर्णयान्त तस्मै निवेदितवन्तः । कुमारस्तु स्मितवि[3]च्छुरिताधरोऽवा[4]दीत् । भो विप्राः ! अहं यौष्माकं झगटकं निर्णयामि श्रूयतामवहितैः । यस्य तावदस्या कनककलशः प्रददे स तेनैव निर्वृतोऽस्तु । यस्य कल[5]शे कृष्णमृत्स्ना निरगात्स क्षेत्रकेदारादीन् गृह्णातु[6] । यस्य तु[7] बुसं स कोष्ठागारगत-धान्यानि सर्वाण्यपि स्वीकुरुताम् । यस्य चास्थीनि निरगुः सोऽश्वगोमहिषीवृषभदासीदासादिकमुपादत्तामिति युष्मज्जनक-स्याशयः । इति चौरकण्ठोक्तं श्रुत्वा स्तूचकण्ठाच्छिन्नविवादा स्तद्वचनं प्रतिश्रुत्य[8] तमनुज्ञाप्य प्रत्याययुः स्वनगरीम् । प्रथिता सा तद्विवादनिर्णयकथा पुर्याम् राज्ञाप्याकार्य पर्यनुयुक्ताः । किं नु[9] भो भवता वादनिर्णयो जातः ? तैरुक्तं आम्[10] स्वामिन् ! । केन निर्णीत इति नृपेणोदिते सातवाहनस्वरूपं सर्वमपि [यथा][11] तथमचकथन् । तदाकर्ण्य तस्य शिशोरपि बुद्धिवैभवं विभाव्य प्रागुक्तं दैवज्ञेन तस्य प्रतिष्ठाने राज्य भविष्यदनुस्मृत्य तं

---

१ 'निरव(?)यणादि' A. २ 'मालवेश्य(श ?)' A.

३ 'विकु(च्छु ?)रिता' A.

४ 'अवादीन्(त् ?)' A. 'अवादीत(त् ?)' B.

५ 'काल[शे ?]' A. ६ 'गृह्णा(ह्णा ?)तु' A. B.

७ 'बु(तु ?) बुसं' B. ८ 'प्रतिश्रुत्यः(त्य ?)' A.

९ 'किंनु(नु ?)' A. १० 'आम(म् ?)' A. B.

११ 'सर्वमपि[यथा ?]तथं' A. B.

स्वप्रतिपन्थिनमाकलय्य क्षुभितमनास्तन्मार[1]णौपयिकमचिन्तयच्चिरं[2] नरेश्वरः । अभिच(चा ?)रादिप्रयोगैर्मारिते चास्मिन् यशःक्षात्रवृत्ति-क्षतौ भवेतामिति विचार्य सन्नद्धचतुरङ्गचमूसमूहो**ऽवन्तिपतिः** प्रस्थाय प्रतिष्ठानपत्तनं यथेष्टमवेष्टयत् । तदवलोक्य ते ग्राम्या-स्त्रस्ताश्चिन्तयन्ति स्म । कस्योपर्ययमेतावानाटोपः सकोपस्य **मालवेशस्य** । न तावदत्र राजा राजन्यो वा वीरस्तादृग् दुर्गादि वेति चिन्तयत्सु तेषु **मालवेश**प्रहितो दूतः समेत्य **सातवाहन**मवोचत्[3] । भोः कुमारक[4] ! तुभ्यं नृपः क्रुद्धः प्रातस्त्वां मारयिष्यत्यतो युद्धाद्युपायचिन्तनावहितेन भवता भाव्यमिति । स च श्रुत्वापि दूतोक्तीर्निर्भय निर्भरं क्रीडन्ने-वास्ते[5](स्त) । अत्रान्तरे विदितपरमार्थौ तौ तन्मातुलावितरेतरं प्रति विगतदर्विकल्पौ पुनः **प्रतिष्ठान**मागतौ । परचक्रं दृष्ट्वा भगिनीं प्रोचतुः । हे [6]स्वसः ! येन दिवौकसा तवायं तनयो दत्तस्तमेव स्मर[7] यथा स एवास्य साहायकं विधत्ते । सापि तद्वचसा प्राचीनं नागपतेर्वचः स्मृत्वा शिरसि निवेशितघटा **गोदावर्यां नागह्रदं** गत्वा स्नात्वा च तमेव[8] नागनायकमारा-धयत् । तत्क्षणान्नागराजः प्रत्यक्षीभूय वाचमुवाच ब्राह्मणीम् ।

---

१ 'मारणो(णौ ?)पयिक' A. २ 'च्चि(च्च ?)रं' B.
३ 'अवोचत(त् ?)' A. ४ 'भोः कुमारः(र ?)क' B.
५ 'आस्त' A. B. ६ 'स्व[स ?]येन' A.
७ 'स्म । [र ?]' B. ८ 'न(त ?)मेव' A.

को हेतुरह[1]मनुस्मृतस्त्वया । तथा(था)च[2] प्रणम्य यथास्थित-मभिहिते बभाषे शेषराजः । मयि प्रतपति कस्तव तनय-मभिभवितु क्षमः । इत्युदीर्य तद्घटमादाय ह्रदान्तर्निमज्ज्य[3] पीयूषकुण्डात् सुधया घटं प्रपूर्यानीय च तस्मै दत्तवान् । गदितवांश्चानेनामृतेन सातवाहनकृतमृन्मयाश्वरथगजपदाति जातमभिषिञ्चेः । यथा तत्सजीव भूत्वा परबलं भनक्ति । त्वत्पुत्रं च प्रतिष्ठानपत्तनराज्ये अयमेव पीयूषघटोऽभिषेक्ष्यति । प्रस्तावे पुनः स्मरणीयोऽहमित्युक्त्वा स्वास्य[4]दमगमद्भुजङ्गपुङ्गवः । सापि सुधाघटमादाय स्वसद्मोपेत्य तेन तन्मृन्मयं सैन्यमदं न्यम-भ्युक्षामास । प्रातर्दिव्यानभावतः सचेतनीभूय तत्सैन्यं संमुखं गत्वा युयुधे परानीकिन्या सार्द्धम् । तया सातवाहनपृतनया भग्न-मवन्तीशितुर्बलम् । विक्रमनृपतिरपि पलाय्य ययाववन्तीम् । तदनु सातवाहनो राज्येऽभिषिक्तः । प्रतिष्ठानं च पुनर्निज-विभूतिपरिभूतवस्त्वोकसाराभिमानं धवलगृह देवगृह हट्टपङ्क्ति-राजपथ प्राकारपरिखादिभिः सुनिविष्टम[5]जनिष्ट पत्तनम् । सातवाहनोऽपि क्रमेण दक्षिणापथमनृणं विधाय तापीतीर-

---

[1] 'हेतुः(तु ?)रहं' B. [2] 'तथा(या ?)' A. B.
[3] 'निमज्ज्य(ज्ज्य ?)' A. [4] 'स्वास्य(स्प ?)' A. B.
[5] 'सुविन(निवि ?)ष्ट' B.

पर्यन्तं चोत्तरापथं साधयित्वा स्वकीयसंवत्सरं प्रावीवृतत्, जैनश्च समजनि । अचीकरच्च जनितजननयनप्रीत्यानि जिन-चैत्यानि । पञ्चाशद्वीरा अपि प्रत्येकं स्वस्वनामाङ्कितान्यस्मिन्नगरं कारयांबभूवुर्जिनभवनानि ।

॥ इति प्रतिष्ठा[1]नपत्तनकल्पः ॥[2]

ग्रं. ४७

---

१ 'इति प्रतिष्ठापन(नप ?)त्तनकल्पः' B.

२ A पुस्तके पत्रसमाप्तिहेतुकं 'शुभं भवतु' इति समधिकम् ।

अथ प्रसङ्गतः परसमयलोकप्रसिद्धं सातवाहनचरित्रशेषमपि किंचिदुच्यते। श्रीसातवाहने चितिं रचति पञ्चाशद्वीराः प्रतिष्ठाननगरान्तस्तदा वसन्ति स्म पञ्चाशच्च नगराद्बहिः। इतश्च तत्रैव पुरे एकस्य द्विजस्य सूनुर्दर्पोद्धुरः[1] शूद्रकाख्यः समजनि। स च युद्धश्रमं दर्पात् कुर्वाणः पित्रा स्वकुलानुचितमिदमिति प्रतिषिद्धो नास्थात्[2]। अन्येद्युः सातवाहननृपतिर्वापल्ला-खूंदल्लादिपुरान्तर्वर्तिवीरपञ्चाशदन्वितो द्विपञ्चाशद्धस्तप्रमाणां शिलां श्रमार्थमुत्पाटयन् दृष्टः पित्रा समं गच्छता द्वादशाब्ददेशीयेन शूद्रकेण। केनापि वीरेणाङ्गुलचतुष्टयं केनचित् षडङ्गुलान्यपरेण[3] त्वङ्गुलान्यष्टौ शिला भूमित उत्पाटिता। महीजानिना त्वाजानु नीता इत्यवलोक्य[4] शूद्रकः स्फूर्जदूर्जितमवादीत्। भो भोः! भवत्सु मध्ये किं शिलामिमामामस्तकं न कश्चिदुद्धर्तुमीष्टे। तेऽपि सेर्ष्यमवादिषुर्यथा त्वमेवोत्पाटय यदि समर्थंमन्योसि। शूद्रकस्तदाकर्ण्य तां शिलां वियति तथोच्छालयांचकार यथा सा दूरमूर्द्धमगमत्। पुनरवादि शूद्रकेण[5] यो भवत्स्वसंभूष्णुः

१ 'दर्पोद्ध(द्धु ?)रः' A. B.

२ 'नास्थानात्(स्थात् ?)' A. B.

३ 'अपरेण त्वङ्गुलानि' इति B. पुस्तके नास्ति।

४ 'इत्ये(त्य ?)वलोक्य' A.

५ 'शूद्रकेन' B. 'शूद्रकेन' इत्यारभ्य 'तथा मुष्टिप्रहारेण प्रहृतवान्' इत्यन्तं पाठः A. पुस्तके नास्ति। लेखकदोषेण 'शूद्रकस्तदाकर्ण्य तां शिलां वियति तथोच्छालयांचकार' इति द्विवारं लिखितमिह।

न खल्विमां निपतन्तीं स्तभातु सातवाहनादिवीरैर्भयोद्भ्रान्त-
लोचनैरूचे स एव सानुनयम् । यथा-भो महाबल ! रक्ष
रक्षास्माकीनान् प्राणानिति । स पुनस्तां पतयालुं तथा मुष्टि-
प्रहारेण प्रहृतवान् यथा सा त्रिखण्डतामन्वभूत् । तत्रैकं शकलं
योजनत्रयोपरि न्यपप्त(त ?)त्, द्वितीयीकं च खण्डं नागह्रदे
तृतीयं तु प्रतोलीद्वारे चतुष्पथमध्ये निपतितमद्यापि तथैव
वीक्ष्यमाणमास्ते जनैः । तद्बलविलसितचमत्कृतचेताः क्षोणिनेता
शूद्रकं सुतरां सत्कृत्य पुरारक्षकमकरोत् । शस्त्रान्तराणि
प्रतिषिध्य दण्डधारस्त[1]स्य दण्डमेवायुधमन्वज्ञासीत् । न (स)[2] च
शूद्रको बहिश्चरान् वीरान् पुरमध्ये प्रवेष्टुमपि न दत्तवान्, अनर्थ-
निवारणार्थम् । अन्यदा स्वसौधस्यो[3]परितले शयानः सातवाहनः
क्षितिपतिर्मध्यरात्रे शरीरचिन्तार्थमुत्थितः पुराद्बहिःपरिसरे करुणं
रुदितमाकर्ण्य तत्प्रवृत्तिमुपलब्धुं कृपाण[4]पाणिः परदुःखदुः[5]खित-
हृदयतया गृहान्निरगमत् । अन्तराले शूद्रकेना(णा ?)वलोक्य
सप्रश्रयं प्रणतः पृष्टश्च महानिशायां निर्गमनकारणम् । धरणी-
पतिरवदद्यदयं बहिःपुरप[6]रिसरे करुणक्रन्दितध्वनिः श्रवणाध्वनि
पथिकीभावमनुभवन्नस्ति तत्कारणप्रवृत्तिं ज्ञातुं व्रजन्नस्मीति
राज्ञोक्ते शूद्रको व्यजिज्ञ[7]पत् । देव ! प्रतीक्ष्यपादैः स्वसौधा-

---

१ 'दण्डधारस्तस्य' इति B. पुस्तके नास्ति ।
२ 'न (स ?) च' A. B.   ३ 'स्वसौध्य (ध ?)स्य' A.
४ 'कृपाणपाणि [:]' A.   ५ 'पर[दुःख]दुःखित' A.
६ 'पुरपरिसरं' A., 'पुरपरिसर (रे ?)' B.
७ 'व्यजिन्य(ज्ञ ?)पत्' A., 'व्यजिन्य(ज्ञ ?)पत (त् ?)' B.

संकरणाय पादोऽवधार्यतामहमेव तत्प्रवृत्तिमानेष्यामीत्यभि[१]धाय वसुधानायकं व्यावर्त्त्य[२] स्वयं रुदितध्वन्यनुसारेण पुराद्बहिर्गन्तुं प्रवृत्तः। पुरस्ताद् व्रजन् दत्तकर्णो[३] गोदावर्याः स्रो(स्रो)तसि कंचन रुदन्तमश्रौषीत्। ततः परिकरबन्धं विधाय शूद्रकस्तीर्त्वा यावत्सरितो मध्यं प्रयाति तावत्पयःपूरप्लाव्यमानं नरमेकं रुदन्तं वीक्ष्य बभाषे। भोः! कस्त्वं किमर्थं च रोदिषीत्यभिहितः स नितरामरुददतिनिर्बन्धेन पुनः पृष्टः स्पष्टमा[४]चष्टे भोः साहसिक-शिरोमणे! मामितो निष्काश्य भूपतेः समीपं प्रापय येन तत्र स्ववृत्तमाचक्षे—इत्युक्तः शूद्रकस्तमुत्पाटयितुं यावद्यतिष्ट ताव-न्नोत्पटति स्म सः। ततोऽधस्तात्केनापि यादसा मा विधृतोऽयं भवेदित्याशङ्क्य सद्यः कृपाणिकामधो वाहयामास[५] शूद्रकः[६]। तदनु शिरोमात्रमेव शूद्रकस्योद्धर्त्तुः करतलमारोहत् लघुतया तच्छिरः प्रचरद्रुधिरधारमवलोक्य शूद्रको विषादमापेदान-श्चिन्तयति स्म—धिग्मामप्रहर्तारं प्रहर्तारं शरणागतघातुकं चेत्यात्मानं निन्दन् वज्राहत इव क्षणं मूर्च्छितस्तस्थौ। तदनु समधिगतचैतन्यश्चिरमचिन्तयत् कथमिवैतन् स्वदुश्चेष्टितमवनिपतये

---

१ 'अभिधानाय (धाय)' B.

२ 'व्यावृर्थ्य (वर्त्त्य?)' A., 'व्यावृत्त्य (वर्त्त्य?)' B.

३ 'दत्तकर्णौ (र्णो?)' A. B.

४ 'आचष्ट' T. B., 'आचष्टे' A.

५ 'वाहया (या?) मास' A.

६ 'शूद्रकः। इत्यारभ्य—'प्रचरद्रुधिरधारमवलोक्य' इत्यन्तं A. पुस्तके नास्ति।

निवेदयिष्यामीति लज्जितमनास्तत्रैव काष्ठैश्चितां विरच्य तत्र ज्वलनं प्रज्वाल्य तच्छिरः सह गृहीत्वा यावदुदर्चिषि प्रवेष्टुं[1] प्रवर्तते तावत्तेन मस्तकेन निजगदे—भो महापुरुष ! किमर्थ-मित्थं व्यवसीयते भवता यावदहं शिरोमात्रमेवास्मि सैंहिकेय-वत्सदा । तद्वृथा मा विषीद प्रसीद, मां राज्ञः समीप-मुपनयेति तद्वचनं निशम्य चमत्कृतचित्तः प्राणित्ययमिति प्रहृष्टः शूद्रकस्तच्छिरः पट्टांशुकवेष्टितं विधाय प्रातः सातवाहनमुपा-गमत् । अपृच्छदथ पृथ्वीनाथः—शूद्रक ! किमिदम् । सो-ऽप्यवोचत् । देव ! सोऽयं यस्य क्रन्दितध्वनिर्दिवेन रात्रौ शुश्रुवे इत्युक्त्वा तस्य प्रागुक्तं वृत्तं सकलमावेदयत् । [2]पुना राजा तमेव मस्तकमप्राक्षीत् भोः ! कस्त्वं किमर्थं चात्र भवदागमन-मिति । तेनाभिदधे महाराज ! भवतः कीर्तिसुभाकर्णि समाकर्ण्य करुणरुदितव्याजेनात्मानं ज्ञापयित्वा त्वामहमुपागमं दृष्टश्च भवान्, कृतार्थे मेऽद्य चक्षुषी जाते इति । कां कलां सम्यगवगच्छसीति राज्ञा पृष्टे तेनोक्तं देव ! गीत[3]कलां वेद्मि । ततो राज्ञ आज्ञया निरवगीतं गीतं गातुं प्रचक्रमे । क्रमेण तद्गानकलया मोहिता[4] सकलापि नृपतिप्रमुखा परिषत् । स च मायासुरनामकोऽसुरस्तां मायां निर्माय महीपतेर्महिषीं महनीयरूपधेयामपजिहीर्षुरुपागतो बभूव । न च विदितचर-मेतत्कस्यापि । लोकैस्तु शीर्षमात्रदर्शनात्तस्य प्राकृतभाषया

---

१ 'प्रवेष्टं (ष्टुं ?)' A. २ 'पुन (ना) राजा' A.

३ 'गीतकला (लां ?)' B.

४ 'मोहितापि सकलापि' A. B.

'सीसुखा' इति व्यपदेशः कृतः। तदनु प्रतिदिनं तस्मि-न्नतितुम्ब(म्बु!)रौ मधुरतरं गायति सति श्रुतं तत्स्वरूपं महा-देव्या। दासीमुखेन भूपं विज्ञ(ज्ञा?)प्य [1]तच्छीर्षं स्वान्तिक-मानायितम्। प्रत्यहं तमश्रीगपत् राज्ञी। दिनान्तरे रात्रौ प्रस्तावमासाद्य सद्य एवापहरति स्म तां मायासुरः। आरोपया-मास च तां घण्टावलम्बिनामनि स्वविमाने। राज्ञी च करुणं क्रन्दितुमारेभे। हा[2]हं केनाप्यपहिये? अस्ति कोऽपि वीरः पृथिव्यां यो मां मोचयति। तच्च खूंद[3]लाभिख्येन वीरेण श्रुत्वा धावित्वा व्योमन्युत्पत्य च तद्विमानस्य घण्टा पाणिना गाढ-मधार्यत। ततस्तत्प्राणेनावष्टब्धं विमानं पुरस्तान्न प्राचा[4]लीत्। तदनु चिन्तितं मायासुरेण किमर्थं विमानमेतन्न सर्पति?। यावदद्राक्षीत् तं वीरं हस्तावलम्बितघण्टं ततः खड्गेन तद्-हस्त[5]मच्छिदत्। पतितः पृथिव्यां वीरः। स चासुरः पुरः प्राचलत्। ततो विदितदेव्यपहारवृत्तान्तः चिन्तिकान्तः पञ्चा-शतमेकोनां(नान्?) वीरानादिक्षत्—यत्पट्टदेव्याः शुद्धिः क्रियतां केनेयमपहृतेति। ते प्रागपि शू[6]द्रकं प्रत्यसूयापराः प्रोचु-र्महाराज! शूद्रक एव जानीते ते[7]नैव तच्छीर्षकमा[8]नीतं तेनैव च देवी जह्रे। ततो नृपतिस्तस्मै कुपितः शूलारोपण-

[1] 'तच्छीर्षि' A. B. [2] 'हो (हा?)' A.
[3] 'खं (खूं?) दला' B. [4] 'प्र (प्रा?)चालीत्' B.
[5] 'हस्तमं (म?) च्छिदत्' A. B.
[6] 'सू (शू?)द्रकं' B. [7] 'ने(ते?)नैव' A. B.
[8] 'आनीत (तं?)' B.

माज्ञाप[1]यत(न्)। तदनु देशरीतिवशात्तं रक्तचन्दनानुलिप्ताङ्गं शकटे [2]शा[य]यित्वा तेन सह गाढं बद्ध्वा शूलायै याव-द्राजपुरुषाश्चेलुस्तावत् पश्चाच्छदपि वीरा(:?) संभूय शूद्रक-मवोचत्(न्)। भो महावीर! किमर्थमेवं[3] रण्डे[4]व म्रियते भवान्। अशुभस्य कालहरणमिति न्यायात् मार्गय नरेन्द्रा-त्कतिपयदिनावधिम्। शोधय सर्वत्र देव्यपहारिणं[5] किमकाण्ड एव स्वकीयां वीरत्वकीर्तिमपनयसि। तेनोक्तं गम्यतां तर्हि उपराजं विज्ञ[ा]प्यतामेतमर्थं राजा। तैरपि तथाकृते प्रत्याना-यितः शूद्रकः क्षितीन्द्रेण। तेनापि स्वमुखेन विज्ञप्तिः कृता। महाराज! दीयतामवधिर्येन विचिनोमि प्रतिदेशं देवीं त[6]-दपहारिणं च। राज्ञा दिनदशकमवधिर्दत्तः। शूद्रकगृहे च सारमेयद्वयमासीत् तत्सहचारि। नृपतिरवददेतद्भषणयुगलं प्रतिभू-प्राय[7]मस्मत्पार्श्वे मुञ्च, स्वयं पुनर्भवान् देव्युदन्तोपलब्धये हिण्डतां महीमण्डलम्। सोऽप्यादेशः प्रमाणमित्युदीर्य वीर्यवान् प्रतस्थे। भूचक्रशक्रस्तत्कौलेयकद्वन्द्वं शृङ्खलाबद्धं स्वशय्यापादयोरबध्नात्। शूद्रकस्तु परितः पर्यटाट्यमानोऽपि यावत् प्रस्तुतार्थस्य वार्तामात्र-मपि क्वापि नोप[8]लेभे तावदचिन्तयदहो! ममेदमपय[9]शः

---

१ 'आज्ञापयत्' B. २ 'शाययित्वा' B.

३ 'एव (वं?)' B. ४ 'क्षि(?)रण्डेव म्रियते' A.

५ 'देव्यपरिच्छा(पहा?)रिणं' A.

६ 'तदपि (प?) हारिणं' A.

७ 'प्रति प्राभूय (तिभूप्राय?)' A.

८ 'नोपलो(ले?)भे' A. ९ 'अयशः' B.

प्रादुरभूद् यदयं स्वामिद्रोही मध्ये भूत्वा देवीमपा[१]जीहरदिति। न च क्वापि शुद्धिर्लब्धा[२] तस्याः। तस्मान्मरणमेव शरणमिति विमृश्य दारुभिश्चितामरचय[३]ज्ज्वलनं चाज्वालयत्। यावन्मध्ये प्राविशत्तावत्ताभ्यां शुनकाभ्यां देवताधिष्ठिताभ्यां ज्ञातं यदस्मदधिपतिर्निधनं धनायतीति। ततो दैवतशक्त्या शृङ्खलानि भङ्क्त्वा निर्विलम्बं गतौ तौ तत्र यत्रासीच्छूद्रकर[४]चिता चिता। दशनैः केशानाकृष्य शूद्रकं बहिर्निष्काश(स)यामासतुः[५]। तेनाथकस्मात् तौ विलोक्य विस्मितमनसा निजगदे—रे पापीयांसौ! किमेतत् कृतं भवद्भ्यामशुभवद्भ्याम्। राज्ञो मनसि विश्वासनिरासो भविष्यति। यत् प्रतिभुवावपि तेनात्मना सह नीताविति। भषणाभ्यां बभाषे—धीरो भव। अस्मद्दर्शितां दिशम[६]नुसर सरभसं का चिन्ता तवेत्यभिधाय पुरोभूय प्रस्थितौ तेन सार्द्धम्। क्रमात् प्राप्तौ कोल्लापुरम्। तत्रस्थं महालक्ष्मीदेव्या भवनं प्रविष्टौ। तत्र शूद्रकस्तां देवीमभ्यर्च्य कुशस्तरासीनस्त्रिरात्रमुपावसत्। तदनु प्रत्यक्षीभूय भगवती महालक्ष्मीस्त[७]मवोचत्। वत्स! किं मृगयसे। शूद्रकेणोक्तं स्वामिनि!

---

१ 'उ(अ?)पाजीहरत्' A. B.

२ 'लब्धः (ब्धा?)' B.

३ 'अरचयज्व(ज्ज्व?)लनं' A.

४ 'रचिता [चिता]' A.

५ 'निष्कासयामासतुः' A. B.

६ 'मनुसर' इति द्विवारं लेखकदोषेण B. पुस्तके।

७ 'महालक्ष्मीं(क्ष्मी?)स्तं' B.

सातवाहनमहीपालमहिष्याः शूद्रिं वद क्वास्ते केनेयमपहृता। श्रीदेव्योदितं—सर्वान् यक्षराक्षसभूतादिदेवगणान् संमील्य तत्प्रवृत्ति- महं निवेदयिष्यामि। परं तेषां कृते त्वया बल्युपहारादि प्रगुणीकृत्य धार्यं यावच्च ते कणेहत्य बल्याद्यु[१]पभुज्य प्रीता न भवेयुस्तावत्त्वया विघ्ना रक्ष[२]णीयाः। ततः शूद्रकस्तेषां दे(दै?)वतानां[३] तर्पणार्थं कुण्डं विरचय्य होममारेभे। मिलिताः सकलदैवतगणाः स्वां स्वां भुक्तिमग्निमुखेन जगृहे(हुः?)। तावत्तद्धोम- धूमः प्रसृमरः प्राप तत्स्थानं यत्र मायासुरोऽभूत्। तेनापि परिज्ञातस्त[त्स?]त्स्याद्दिष्टशूद्रकहोमस्वरूपेण प्रेषितः स्वभ्राता कोल्लासुरनामा होमप्रत्यूहकरणाय। समागतश्च वियति कोल्लासुरः स्वसैन्यया समम्। दृष्टश्च दैवतगणैस्तर्कितं च तैः। ततो भषणौ[४] दिव्यशक्त्या युयुधाते दैत्यैः सह। क्रमान् मारितौ च तौ दैत्यैः। ततः शूद्रकः स्वयं योद्धुं प्रावृतत[५](त्)। क्रमेण दण्डव्यतिरिक्तप्रह्रा(ह?)र[६]णान्तराभावाद्दण्डेनैव बहूनिधनं नीतवानसुरान्। ततो दक्षिणबाहुं दैत्या[७]स्तस्य चिच्छिदुः। पुनर्वामदोष्णैव[८] दण्डयुद्धमकरोत्। तस्मिन्नपि छिन्ने दक्षिणा- ङ्घ्रिणो[९]पात्तदण्डो योद्धुं लग्नः। तत्रापि दैत्यैर्लूने वाम[१०]-

---

१ 'बल्याद्(द्यु?)पभुज्य' A. २ 'रक्षणीया(:)' A. B.

३ 'दे(दै?)वतानां' A. B. ४ 'भषणो(णौ?)' B.

५ 'प्रावृतत्' A. B. ६ 'प्रहरण(णा?)' B.

७ 'तस्य' इति B. पुस्तके नास्ति। ८ 'वामदोर्ष्णै(ष्णै?)व' A.

९ 'दक्षिणाङ्घ्रि(ङ्घ्रि?)णो' A. B.

१० 'वामपदत्र(दात्त?)' A., 'वामपद...यष्टिः' B.

पदान्तर्यष्टिरयुध्यत। तमपि क्रमादच्छिदसुराः[1]। ततो दन्तै-र्दण्डमादाय युयुधे। ततस्तैर्मस्तकमच्छेदि। अथाकण्ठकष्टप्रा देवगणास्तं शूद्रकं[2] भूमिपतितशिरस्कं दृष्ट्वा अहो! अस्य-कुक्रिदातुर्वराकस्यास्य[3] किं जातमिति परितप्य योद्धुं प्रवृत्ताः कोल्लासुरममारयन्। ततः श्रीदेव्या अमृतेनाभिषिच्य पुनरनुसंहिताङ्गखण्डः[4] शूद्रकः प्रत्युज्जीवितस्य। सारमेया-वपि पुनर्जीवितौ। देवी च प्रसन्ना सती तस्मै खड्गरत्नं[5]प्रददौ, अनेन त्वमजय्यो भविष्यसीति च वरं व्यतरत्। ततो महालक्ष्म्यादिदैवतगणैः सह सातवाहनदेव्याः शुद्ध्यर्थं समग्रमपि भुवनं परिभ्राम्य प्राप्तः शूद्रको महार्णवम्। तत्र चैकं वटतरुमुच्चैस्तरं निरीक्ष्य विश्रामार्थमारुरोह। यावत्पश्यति तच्छाखायां लम्बमानमधःशिरसं काष्ठकीलिकाप्रवेशितो[6]र्द्ध्वपादं पुरुषमेकम्। स च प्रसारितजिह्वोऽन्तर्जलं विचरतो[7] जलचरादीन् भक्षयन् वीचितस्तैः। पृष्टश्च शूद्रकेण[8]—कस्त्वं किमर्थं चेत्थं लम्बितोऽसि। तेनोक्तमहं मायासुरस्य कनिष्ठो भ्राता। स च मदग्रोन्मदिष्णुर्मदग्रजः प्रतिष्ठानाधिपतेः सातवाहनस्य महिषीं रिरंसु[9]रपाहरत् सीतामिव दशवदनः। सा च

---

१ 'च्छिक्ष(च्छि ?) [द]न्नसुराः' B. २ 'शूद्रं' B.

३ 'अस्य' इति A. पुस्तके नास्ति।

४ 'खंडे(खण्डे ?)' B. ५ 'ददौ' B.

६ 'प्रवेशितोर्द्ध(र्द्ध ?)पादं' A. B.

७ 'विरच (चर ?)तो' B. ८ 'शूद्रकेन(ण ?)' A. B.

९ 'रिरंसंसुः(रिरंसुः ?)' A.

पतिव्रता तन्नेच्छति । तदनु मया प्रोक्तोऽग्रजन्मा न युज्यते परदारापहरणं तव ।

" विक्रमाक्रान्तविश्वोऽपि परस्त्रीषु रिरंसया ।

कृत्वा कुलक्षयं प्राप नरकं दशकंधरः ॥ "

इत्यादिभिर्वाग्भिर्निषिद्धः क्रुद्धो मह्यं मायासुरोऽस्यां वटशाखायां टङ्कित्वा मामित्थं व्यडम्बयत् । अहं च प्रसारित-रसनः समुद्रान्तःसंचरतो[2] जलचरादीनभ्यवहरन् प्राणयात्रां करोमीति श्रुत्वा शूद्रको[3]ऽप्यभाणीदहं तस्यैव महीभृतो भृत्यः शूद्रकनामा । तामेव देवीमन्वेष्टुमागतोऽस्मि । तेनोक्तमेवं चेत्तर्हि मां मोचयत यथा[4]हं सह भूत्वा तं दर्शयामि तां च देवीम् । तेन स्वस्थानं परितो जातुषं दुर्गं कारितमस्ति । तच्च निरन्तरं प्रज्वलदेवास्ति । ततस्तदुल्लङ्घ्य मध्ये प्रविश्य तं निपात्य देवी प्रत्याहर्तव्या इत्याकर्ण्य शूद्रकस्तेन कृपाणेन तत्काष्ठ-बन्धनानि च्छित्त्वा तं पुरोधाय[5] दैवतगणपरिवृतः प्रस्थाय प्राकारमुल्लङ्घ्य तत्स्थानान्तः प्राविशत् । दैवतगणांश्चावलोक्य मायासुरः स्वसैन्यं युद्धाय प्रजिघाय । तस्मिन् पञ्चतामञ्चिते स्वयं योद्धुमुपतस्थे । ततः क्रमेण शूद्रकस्तेनासिना तमवधीत् । ततो घण्टावलम्बिविमानमारोप्य देवीं[6] दैवतगणैः सत्रा प्रस्थितः प्रतिष्ठानं प्रति ।

---

१ 'इत्यादि(भि ?)र्वाग्भिः' A. २ 'संचरं(र ?)तो' A.

३ 'शूद्रो(द्रको ?)' B. ४ 'तथाहं' B.

५ 'प(पु ?)रोधाय' B. ६ 'देवी(वीं)' B.

इतश्च दशमं[1] दिनम[2]वधीकृतमागतमवगत्य जगत्यधिपति-र्ध्यातवान्। अहो न मम महादेवी न च शूद्रकवीरो नापि च तौ रसना[3]लिहौ। सर्वं मयैव कुबुद्धिना विनाशित-मिति शोच[य]न्[4] सपरिच्छद एव प्राणत्याग(गं) चिकीः(कीर्षुः) पुरादहिश्चितामरचयच्चन्दनादिदारुभिः। यावत् क्षणादाशुशुक्षणिं क्षेप्स्यति परिजनश्चितौ तावद्धर्षापक एको देवगणमध्यात्समायासीत्, व्यजिज्ञपच्च सप्रश्रयम्। देव! दिष्ट्या [5]वर्द्धसे महादेव्या-गमनेन। तन्निशम्य श्रम(व)ण[6]रम्यं नरेश्वरः स्फुरदानन्दकन्दलित-हृदय ऊर्ध्वमवलोकयन्नालुलोके नभसि दैवतगणं शूद्रकं च। अयमपि विमानादवतीर्य राज्ञः पदोर[7]पतत् महा[8]देवी च। अभिन[9]नन्द सानन्दं मेदिनीन्दुः[10] शूद्रकं राज्यार्द्धं च . . . प्रादित[11]। सोत्सवमन्तर्नगरं प्रविश्य श्रुतशूद्रकचारुचरित[12](:) सह महिष्या राज्यश्रियमुपबुभुजे महाभुजः।

इत्थंकारं नानाविधानान्यवदानानि हालक्षितिपालस्य कियन्ति नाम व्यावर्णयितुं पार्यन्ते। स्थापिता चानेन गोदावरीसरित्तीरे

---

१ 'दशं(शमं ?)' A.　　२ 'दिन म ?]वधीकृत्य' B.
३ 'रसनाशौलि(लिहौ ?)' B.　　४ 'शोचयन्' B.
५ 'वर्द्धसे' B.　　६ 'श्रम(व ?)णा' A.
७ 'पदो[र ?]पतत्' A. B.　　८ 'महादी(दे ?)वी' A.
९ 'अभिननन्दन(ननन्द ?)' B.
१० 'मेद(दि ?)नीन्दः' A. 'मेदिनी.. :' B.
११ 'प्रादिता(त ?)' A.　　१२ 'चरित[:]' A. B.

महालक्ष्मीः। प्रासादे अन्यान्यपि यथार्हं दैवतानि निवेशितानि[1] तत्तत्स्थानेषु। राज्यं प्राज्यं चिरं भुञ्जाने जगतीजानावन्यदा कश्चिद्दारुभारवाहकः[2] कस्यचिद्वणिज[3]स्य(जो) वीथौ प्रत्यहं चारूणि दारूण्याहृत्य विक्रीणीते स्म। दिनान्तरे च तस्मिन्न-नुपे[4]युषि वणिजा तद्भगिनी पृष्टा किमर्थं भवद्भ्रातास्य नागतो मदीय्या[5]म्। तया बभाणे श्रेष्ठिश्रेष्ठ! मत्सोदर्यः स्वर्गिषु संप्रति प्रतिवसति। वणिगभणत्कथमिव। सावद्[6]त्कङ्कणबन्धा-दारभ्य विवाहप्रकरणे दिनचतुष्टयं[7] नरः स्वर्गिष्विव वसन्तमात्मानं मन्यते तत्तदुत्सवालोकनकौतूह[8]लात्। तच्चाकर्ण्य राजाप्य-चिन्तयदहो अहं किं न स्वर्गिषु वसामि। चतुर्षु दिनेष्वनवरतं विवाहोत्सवमय एव स्थास्यामीति विचार्य चातुर्वर्ण्ये यां यां कन्यां युवतिं वा रूपशालिनीं पश्यति शृणोति स्म वा तां तां सोत्सवं पर्यणैषीत्। एवं च भूयस्यनेहसि [9]गच्छति लोकैश्चिन्तितमहो! कथं भाव्यमनपत्यैरेव सर्ववर्णैः स्थेयम्, सर्वकन्यास्तावद्राजैव विवोढा योषिदभावे च कुतः सन्ततिरिति। एवं विषण्णेषु[10] लोकेषु **विवाह-वाटिका**नाम्नि ग्रामे वास्तव्य एको द्विजः **पीठजादेवी**माराध्य व्यजिज्ञपत्—भगवति! कथं विवाहकर्मास्मदपत्यानां भावीति। देव्योक्तं भो वाडव! त्वद्भवनेऽहमात्मानं कन्यारूपं कृत्वावतरिष्यामि।

---

१ '[नि ?]वेशितानि' A.
२ 'हार(वाह ?)कः' A.
३ 'वणिजस्य(जो)' A. B.
४ 'तस्मिन्नु(न्ननु ?)पेयुषि' A.
५ 'मदीय्या' B.
६ 'सा च(व)[द ?]त्' B.
७ 'चतुष्टय(यं)' A. B.
८ 'को(कौ ?)तूहलात्' B.
९ 'गच्छं(च्छ ?)ति' B.
१० 'विषन्ने(ण्णे ?)षु' A. B.

यदा मां राजा प्रार्थयते तदाहं तस्मै देया शेषमहं भणि(णि?)ष्ये। तथैव राजा तां रूपवतीं श्रुत्वा विप्रमयाचत। सोऽपि जगाद दत्ता मया परं महाराज! अत्रा[1]गत्य मत्कन्योद्वोढव्या। प्रतिपन्नं राज्ञा। गणकदत्ते लग्ने क्रमाद्विवाहाय प्रचलितः प्राप्तश्च तं ग्रामं श्वशुरकुलं च नृपतिः। देशाचा[2]रानुरोधाद्वधू-वरयोरन्तराले जवनिका दत्ता। अञ्जलि[3]युगं[4]धरौ लाजैर्भृतौ लग्नवेलायां तिरस्करिणीमपनीय यावदन्योन्यस्य शिरसि लाजान् विकि[5]रीतुं प्रवृत्तौ तदनु[6] किल हस्त[7]ले(मेला)पो भविष्य[8]तीति। तावद्राजा तां रौद्ररूपां राक्षसीमिवैक्षिष्ट। ते च लाजाः कठिनपाषाणकर्कररूपा राज्ञः शिरसि लगितुं लग्नाः। क्षिति-पतिरपि किमपि वैकृत[9]मिदमिति विभावयन् पलायित-स्तावत् सा पृष्ठलग्नाश्मशकलानि वर्षन्ती प्राप्ता। ततो[10] नर-पतिर्नागह्रदं प्राविशन्निजजन्मभूमिम्। तत्रैव च निधनमानशे इति। अद्यापि सा **पीठजा**-देवी प्रतोल्या बहिरास्ते निज-प्रासादस्था। शूद्रकोऽपि क्रमेण कालिकादेव्याऽजारूपं विकृत्य वाप्यां प्रविष्टया करुणरसितेन विप्रलभ्य तन्निष्कासनार्थं प्रवि[11]शन् पतितस्य तस्य कृपाणस्य कूपद्वारे तिर्यक्पतनाच्छिन्ना[12]ङ्गः पञ्चता-

---

१ 'म(ब?)त्रा' A. B. २ 'देशाचा[रा?]नुरोधात्' B.

३ 'अञ्जली: (लिः?)' A. ४ 'युगंधरै(रौ?) लाजैः' B.

५ 'विक(कि?)रीतुं' A. B. ६ 'त[द?]नु' B.

७ 'हस्तले(मेला?)पो' A. B. ८ 'भविष्यती(ती?)ति' B.

९ 'वैकृतं' B. १० 'तनो(तो?)' B.

११ 'प्रति(वि?)शन्' B. १२ 'छिन्नागाः(ङ्गः?)' A.

मानस्य। महालक्ष्म्या हि वरवितरणावसरेऽस्मादेव कौचेयकात्तव दिष्टान्तावाप्तिर्भविचीत्यादिष्टमासीत्। ततः शक्तिकुमारो राज्येऽभिषिक्तः सातवाहनायतिः। तदनन्तरमद्यापि राजा न कश्चित्प्रतिष्ठाने प्रविशति वीरक्षेत्रे इति।

अत्र च यदसंभाव्यं क्वचिदूचे तत्र परसमय एव मन्तव्यो हेतुर्यत्रासंगतवाग्जनो जैनः॥

इति प्रतिष्ठान[1]कल्पः प्रसङ्गतः सा[2]तवाहनचरित्रलेशश्च विरचितः श्रीजिनप्रभसूरिभिः॥

च[3]क्रे प्रतिष्ठानकल्पः श्रीजिनप्रभसूरिभिः।
सातवाहनभूपस्य कथांशश्च प्रसङ्गतः॥

ग्रं. १६६। अ. ८॥

---

१ 'प्र[ति ?]ष्ठान' A.

२ 'सातवाहनचरितलेशश्च जिनप्रभसूरिभिः' इति A. पुस्तके नास्ति।

३ 'पद्यस्यास्य पूर्वार्द्धं' A. पुस्तके नास्ति।

कृतदर्शनभङ्गानामङ्गानां जनपदस्य भूषायाः[१]।
चम्पापुर्याः कल्पं जल्पामस्तीर्थपु(धु ?)र्यायाः ॥

अस्यां द्वादश[२]जिनेन्द्रस्य श्री[३]वासुपूज्यस्य त्रिभुवनजन-पूज्यानि गर्भावतारजन्मप्रव्रज्याकेवलज्ञाननिर्वाणोपगमलक्षणानि पञ्च-कल्याणकानि जज्ञिरे ॥ १ ॥

अस्यामेव श्रीवासुपूज्यजिनेन्द्रपुत्रमघवनृपतिपुत्री ल[४]क्ष्मी-कुक्षिजाता रोहिणी नाम कन्याऽष्टानां पुत्राणामुपरि जज्ञे। सा च स्वयंवरेऽशोकराजन्यकण्ठे वरमालां निक्षिप्य तं परिणीय पट्टराज्ञी जाता। क्रमेणाष्टौ पुत्रांस्तनयाश्च पुत्री-रजीजनत् ॥ २ ॥

अन्यदा [श्री][५]वासुपूज्यशिष्ययो रूप्यकुम्भस्वर्णकुम्भयो-र्मुखाददृष्ट[६]दुःखत्वे हेतुं प्राग्जन्मचीर्णं रोहिणीतपः श्रुत्वा सोद्या-पन[७]विधिं प्राचीकशत्, मुक्तिं च सपरिच्छदाऽगच्छत् ॥ ३ ॥

अस्यां करकण्डुनामधेयो भूमण्डलाखण्डलः पुरासीद् यः कादम्बर्यामटव्यां कलिगिरे[८]रुपत्यकावर्तिनि कुण्डनाम्नि सरोवरे श्रीपार्श्वनाथं छद्मस्थावस्थायां विहरन्तं हस्तिव्यन्तरानु-भावात् कलिकुण्डतीर्थतया प्रतिष्ठापितवान् ॥ ४ ॥

अस्यां सुभद्रा महासती पाषाणमयविकटकपाटमयसंपुट-पिहितास्तिस्रः प्रतोलीः शीलमाहात्म्यादामसूत्रतन्तुवेष्टितेन तित-

---

१ 'भूष्यायाः[:]' B. २ 'द्वादशम' A. B.
३ 'श्रीमेव(?) वासुपूज्यस्य' B. ४ 'ल्मील (लक्ष्मी ?)' B.
५ 'श्रीवासुपूज्य' B. ६ 'अदृष्टः(ष्ट ?)' B.
७ 'सोद्यापनविधि' B. ८ 'किलिगिरे' B.

उना कूपाज्जलमाकृष्य तेनाभिषिच्य सप्रभावनमुद्घा(द्घा)[1]टयत्। एकां तु तुरीयां प्रतोलीमन्यापि या किल मत्सदृशी सुचरित्रा भवति तये[2]यमुद्घाटनीयेति भणित्वा राजादिजनसमक्षं तथैव पिहितामेवास्थापयत्। सा च तद्दिनादारभ्य चिरकालं तथैव दृष्टा जनतया। क्रमेण[3] विक्रमादित्यवर्षेषु[4] षष्ट्यधिकत्रयोदशशतेष्वतिक्रान्तेषु [वि. सं १३६०] लक्षणावतीहम्मीर-श्रीसुरत्राणसमसदीनः शंक[5]रपुरदुर्गोपयोगिपाषाण[6]ग्रहणार्थं प्रतोलीं पातयित्वा कपाटसंपुटमग्रहीत्॥ ५॥

अस्यां दधिवाहननृपतिर्महिष्या पद्मावत्या सह तद्दोहद-पूरणार्थमनेकपारूढः संचरन् स्मृतारण्यानीविहारेण करिणा नीं प्रति व्रजताऽपवाहितः स्वयं तरुशाखामालम्ब्य स्थितः। करिणि पुरः संचरिते व्यावृत्त्येमामेव स्वपुरीमागमत्। देवी चासामर्थ्यात्तदारूढैवार[7]ण्यानीमगात्। तदवतीर्णा क्रमेण सूनुं सुषुवे। स च करक[8]न्दु(ण्डु)र्नाम क्षितिपतिरजनि कलिङ्गेषु। पित्रा सार्द्धं युद्ध(द्ध्य?)मानः प्रतिषिद्ध आर्यया जनन्या। क्रमेण महावृषभस्य यौवनवार्द्धक[9]दर्शनाज्जातः प्रत्येकबुद्धः सिद्धिं चाससाद॥ ६॥

अस्यां चन्दनबाला दधिवाहननृपतिनन्दना जन्मसु(उ)प-लेभे। या किल भगवतः श्रीमहावीरस्य कौशाम्ब्यां सूर्प-

---

१ 'उदघाट[य?]न् (त्?) A. B. २ 'त...य' B.
३ 'क्रि(क्र?)मेण' B. ४ 'वर्षेसु(षु?)' B.
५ 'शङ्करप(पु?)र' A. ६ 'पाषाणग्रहार्थं' B.
७ 'भ्रव(र?) ण्यानी' A. ८ 'करकण्डुः' A. B.
९ 'वार्द्धकदशादर्शनाज्जातः' B.

कोशल्यकुल्माषैः पारणाकारणया पञ्चदिनोनषण्मासावसाने द्रव्यक्षेत्र-कालभावाभिग्रहानपूरयत् ॥ ७ ॥

अस्यां पृष्ठचम्पया सह श्रीवीरस्त्रीणि वर्षारात्रसमव-सरणानि चक्रे ॥ ८ ॥

अस्या एव परिसरे श्रीश्रेणिकसूनुरशोक[१]चन्द्रो नरेन्द्रः कूणिकापराख्यः श्रीराजगृहं जनकशोकादिहाय नवीनां चम्पामचीकरच्चारुचम्पकरोचिष्णुं राजधानीम् ॥ ९ ॥

अस्यामेव पाण्डुकुलमण्डनो दानशौण्डे[२]षु दृष्टान्तः श्रीकर्ण-नृपतिरशाद्राज्यश्रियम् । दृश्यन्ते चाद्यापि तानि तानि तदव-दानस्थानानि शृङ्गारचतुरि[३]कादीनि पुर्यामस्याम् ॥ १० ॥

अस्यां सम्यग्दृशां निदर्शनं सुदर्शनश्रेष्ठी दधिवाहन-भूपस्य राज्ञ्याऽभयाख्यया संभोगार्थमुपसर्ग्यमाणः क्षितिपतिवचसा वधार्थं नीतः । स्वकीयनिष्क[४]म्पशीलसम्पत्प्रभावाकृष्टशासनदेवता-सान्निध्यात् शूलं हैमसिंहा[५]सन[ता ?]मनैषीत्, तरवारिं च निशितं सुरभिसुमनोदामभू[६]यमनयत् ॥ ११ ॥

अस्यां च कामदेवः श्रेष्ठी श्रीवीरस्योपासकाग्रणीरष्टा-दशकनककोटिस्वामी गोदशसहस्रयुतषड्गोकुलाधिपतिर्भद्रापति-

---

१ 'अशोकवंशे' B.
२ '...न शौण्डेषु' B.
३ 'चतुर(रि ?)कादीनि' A. B.
४ 'निःकम्प' A. B.
५ 'हैमसिंहासनताम्' A. B.
६ 'सुरभिसुमनोदामभूयमनोदा(?)' A. B.

रभवत् । यः पौ[१]षधागारस्थितो मिथ्यादृग्देवेन पिशाच-गजभुजग[२]रूपैरुपसर्गितोऽपि न क्षोभमभजत् । स्थापितश्च भग-वतान्तःसमवसरणम् ॥ १२ ॥

अस्यां विहरन् श्रीशय्यं[३]भवसूरिश्चतुर्दश पूर्वधरः स्वतनयं मनका[४]भिधानं राजगृहादागतं प्रव्राज्य तस्यायुः षण्मासाव-शेषं श्रुतज्ञानोपयोगेनाकलय्य तदध्ययनार्थं दशवैकालिकं पूर्वगतान्निर्व्यूढवान् । तत्रात्मप्रवादात् षड्जीवनिकां कर्मप्रवादात् पिण्डैषणं(णां ?) सत्यप्रवादाद्वाक्यशुद्धिं अवशिष्टाध्ययनानि प्रत्या-ख्यानप्रवर्त्ततीयवस्तुन इति ॥ १३ ॥

अस्यां वास्तव्यः कुमारनन्दी सुवर्णकारः स्वैभ[५]वाभिभूत-धनदमदोऽक्षशक्षशानुप्रवेशात् पञ्च शैलाधिपत्यमधिगत्य प्राग्भवसुहृद-च्युतविबुधबोधितः[६] चारुगोशीर्षचन्दनमयीं जीवन्त(वत्)[७]स्वामिनीं सालंकारां देवाधिदेवश्रीमहावीरप्रतिमां निर्ममे ॥ १४ ॥

अस्यां पूर्णभद्रे चैत्ये श्रीवीरो व्याकरोद्योऽष्टापदमारोहति स तद्भव एव सिध्यतीति ॥ १५ ॥

---

१ 'पो(पौ ?)षधागार' A.

२ 'भुजगरूपैरुपसर्गितोऽपि न क्षोभ' इति लेखकदोषेण द्विवारं A. पुस्तके ।

३ 'श्रीशय्यभव' B.

४ 'यमनि(न ?)काभिधानं' A.

५ 'स्वविभववैभवाभिभूत' A. B.

६ 'बोधितचारुगोशीर्षं' A.

७ 'जीवन्त[वत् ?]स्वामिनी' A.

अस्यां पालितनामा श्रीवीरोपासको वणिक् तस्य पुत्रः समुद्रयात्रायां समुद्रे प्रसूत इति समुद्रपालो वध्यं नीयमानं वीक्ष्य प्रति[१]बुद्धः सिद्धिं च प्रापत् ॥ १६ ॥

अस्यां सुनन्दः श्राद्धः साधूनां मलदुर्गन्धं[२] निन्दित्वा मृतः कौशाम्ब्यामिभ्यसुतोऽभूद्व्रतं चाग्रहीदुदीर्णदुर्गन्धः कायोत्सर्गेण देवतामाकृष्य स्वाङ्गे सौगन्ध्यमकार्षीत् ॥ १७ ॥

अस्यां कौशिकार्यशिष्याङ्गर्षिः रुद्रकाभ्या[३]ख्यान-संविधानकं सुजातप्रियङ्ग्वादि-संविधानकानि च जज्ञिरे ॥ १८ ॥

इत्यादिनानाविधसंविधानकरत्नप्रकटनानान्तर्निधानमियं पुरी । अस्याश्च प्राकारभित्तिं[४] प्रियसखीव प्रतिक्षणमालिङ्गतिपावन-घनरसपूरितान्तरा सरिद्वरा प्रस्फुरद्वीचिभुजाभिः ॥ १९ ॥

उन्नमतमनरनारीमुक्तामणिधोरणिप्रसवशुक्तिः ।
नगरी विविधाद्भुतवस्तुशालिनी मालिनी जयति ॥२० ॥

जन्मभूर्वासुपूज्यस्य तद्भक्त्या स्तूयते बुधैः ।
चम्पायाः[५] कल्पमित्याधुः (हुः ?) श्रीजिनप्रभसूरयः[६] ॥ २१ ॥

इति श्रीचम्पाकल्पः समाप्तः ॥

ग्रं ४७[७] ॥

---

१ 'प्रतिब(बु ?)द्धः' B. २ 'दुर्गंध्यं(न्धं ?)' A.
३ 'रुद्रकान्याख्यान' B. ४ 'भित्ति(त्तिं ?)' A.
५ 'चम्पाया[ः]' A. ६ 'श्रीजिनप्रभसूरिभिः (रयः ?)' B.
७ 'ग्रं ५७' A.

आनम्य श्रीनेमिनमनेकपुंरत्नजनिपवित्रस्य।
श्रीपाटलिपुत्राख्यनगरस्य प्रस्तुमः कल्पम्[1] ॥ १ ॥

पूर्वं किल श्रीश्रेणिकमहाराजे[2]ऽस्तं गते तदात्मजः कूणिकः पितृशोकाच्चम्पापुरीं न्यवीविशत्। तस्मिंश्चालेख्य[3]शेषतां प्रयाते तत्सुनुरुदायिनामधेयश्चम्पायां क्षोणिजानिरजनिष्ट। सोऽपि स्वपितुस्तानि तानि सभाक्रीडाशयनासनादिस्थानानि पश्यन्नत्योकं शोकमुदवहत्। ततोऽमा[4]त्यानुमत्या नूतनं नगरं निवेशयितुं नैमित्तिकवरान्[5] स्थानगवेषणायादिक्षत्। तेऽपि सर्वत्र तांस्तान् प्रदेशान् पश्यन्तो गङ्गातटं ययुः। तत्र कुसुमपाटलं पाटलितरुं प्रेक्ष्य तच्छोभाचमत्कृतास्तच्छाखायां निषण्णं चाषं व्यात्तवदनं स्वयं-निपतत्कीटकपेटकमालोक्य चेतस्यचिन्तयन्नहो यथास्य चाषपक्षिणो मुखे स्वयमेत्य कीटाः पतन्तः सन्ति तथात्र स्थाने नगरे निवेशितेऽस्य राज्ञः स्वयं श्रियः समेष्यन्ति। तच्च ते राज्ञे व्यजिज्ञपन्। सोऽप्यतीव प्रमुदितः। तत्रैको जरन्नैमित्तिको व्याहरद्देव! पाटलातरुरयं न सामान्यः। पुरा हि ज्ञानिना कथितं—

पाटलाद्रुः पवित्रोऽयं महामुनिकरोटिभूः[6]।
एकावतारोऽस्य मूलजीवश्चेति विशेषतः॥

---

१ 'कल्पम्' इति A. पुस्तके नास्ति।

२ 'महागाज्ञे(जे ?)' A.　　३ 'शेष...प्रयाते' B.

४ 'म(मा ?)त्यानुमा(म ?)त्या' A. B.

५ 'नैमित्तिकवराव्(न् ?) A.　　६ 'क[रो ?]टिभूः' B.

राज्ञोक्तं कतमः स महामुनिः[१]। तदनुजगाद नैमित्तिकः। श्रूयतां देव! उत्तरमथुरायां वास्तव्यो देवदत्ताख्यो वणिक्पुत्रो दिग्यात्रार्थं दक्षिणमथुरामगमत्। तत्र तस्य जय[२]सिंहनाम्ना वणिक्पुत्रेण सह सौहृदमभवत्। अन्यदा तद्गृहे भुञ्जानोऽन्निका-नाम्नीं तज्जामिं स्थाने भोजनं परिवेष्य वातव्यजनं कुर्वतीं[३] रम्यरूपा-मालोक्य तस्यामनुरक्तो द्वितीयेऽह्नि वरकान् प्रेष्य जयसिंहं तामयाचिष्ट। सोऽभ्यधादहं तस्मा एव ददे स्वसारं यो मद्गृहा-द्दूरे न भवति। प्रत्यहं तां तं च यदा पश्यामि। यावद-पत्यजन्म तावद्यदि मद्गृहे स्थाता तस्य जामिं दास्यामीति। देवदत्तोऽप्योमित्युक्त्वा शुभेऽह्नि तां पर्यणैषीत्। तया सह भोगान् भुञ्जानस्या[४]न्यदा पितृभ्यां लेखः प्रेषि। तं वाचयतस्तस्य नेत्रे वर्षितुम[५]श्रू(श्रू ?)णि प्रवृत्ते। ततस्तया हेतुं पृष्टोऽपि याव-न्नाब्रवीत्तावत्तयादाय लेखः स्वयं वाचितस्तत्र चेदं लिखित-मासीत् गुरुभ्याम्। यदावां वृद्धौ निकटनिधनौ यदि च नौ जीवन्तौ दिदृ[६]क्षसे(सि) तदा द्रागागन्तव्यमिति। तदनु सा पतिमाश्व(श्वा ?)स्य भ्रातरं हठादप्यन्वजिज्ञपत्। भर्त्रा सह प्रतस्थे चोत्तरमथुरां प्रति सग[७]र्भा। क्रमान्मार्गे सूनुमसूत। नामास्य पितरौ करिष्यत इति देवदत्तोक्ते परिजनस्तमर्भकमन्निका-

---

१ 'कार्णोटभूः'—इत्यारभ्य 'स महामुनि,' इत्यन्तः पाठः A. पुस्तके नास्ति। २ '[जय ?]सिंहनाम्ना' B.

३ 'कुर्वन्ती' A. B. ४ 'भुञ्जतस्तस्य' A. 'भुञ्जन्तस्तस्य' B.

५ 'अश्रू' A. B. ६ 'दिदृक्षसे(सि ?)' A. 'दि...क्षसि' B.

७ 'सगर्भाः(र्भा ?)' B.

पुत्र इत्युल्लापितवान्। क्रमेण देवदत्तोऽपि स्वपुरीं प्राप्य पितरौ प्रणम्य च शिशुं तयोरार्पयत्। संधीरणेत्याख्यां तौ गमुस्रकाते तथाप्यन्निकापुत्र इत्येव पप्रथेऽसौ। वर्ध-मानस्य प्रा[१]प्ततारुण्योऽपि भोगांस्तृणवद्विधूय जयसिंहाचार्यपार्श्वे दीक्षाम[२]ग्ट(ग्र)हीत्। गीतार्थीभूतः प्रापदाचार्यकम्। अन्यदा विहरन् सगच्छो वार्द्धके पुष्पभद्रपुरं गङ्गातटस्थं प्राप्तः। तत्र पुष्पकेतुर्नृपस्तद्देवी पुष्पवती तयोर्युग्मजौ पुष्पचूलः पुष्पचूला चेति पुत्रः पुत्री चाभूताम्। तौ च सह वर्द्धमानौ क्रीडन्तौ च परस्परं प्रीतिमन्तौ जातौ। राजा दध्यौ यद्येतौ वियु[३]ज्येते तदा नूनं न जीवतोऽहमप्यनयोर्विरहं सोढुमनीशः[४] तदनयोरेव विवाहं करोमीति ध्यात्वा मन्त्रिमित्रपौरांश्छलेना-ऽपृ[५]च्छत्। भो! यद्रत्नमन्तःपुर उत्पद्यते तस्य कः प्रभुः? तैर्विज्ञप्तं दे(व?अ)न्तःपुरोत्पन्नस्य किं वाच्यं यद्देशमध्येऽप्युत्पद्यते रत्नं रा[६]जा तद्यथेच्छं विनियुङ्क्ते। कोऽत्र बाधः? तच्छ्रुत्वा स्वाभिप्रायं निवेद्य देव्यां वारयन्त्यामपि तयोरेव संबन्धमघटयन्नृपः। तौ दम्पती भोगान् [७]भुङ्क्तः(भुञ्जाते) स्म। राज्ञी तु पत्यपमान-वैराग्याद्व्रतमादाय स्वर्गे देवोऽभूत्। अन्यदा पुष्पकेतौ कथाशेषे पुष्पचूलो राजाभूत्। स च देवः प्र[८]युक्तावधिस्तयोरकृत्यं ज्ञात्वा स्वप्ने पुष्पचूलाया नरकानदर्शयत् तद्दुःखानि च। सा

---

१ 'प्रासं(प्त?)' A. २ 'अग्ट(ग्र?)हीत्' A. B.
३ 'वियुज्य(ज्ये?)ते' B. ४ 'अनीशः[:]' A.
५ 'अपृथ(च्छ?)द्' A. ६ 'तद्राजा यथेच्छं विनियुङ्क्ते' A. B.
७ 'भुङ्क्तः स्म' A. B. ८ 'देव प्रयुक्तावधिः' A. B.

च प्रबुद्धा भीता च पत्युः सर्वमावेदयत्। सोऽपि शान्तिक-मचीकरत्। स च देवः प्रतिनिशं नरकांस्तस्या अदर्शयत्। राजा तु सर्वांस्तीर्थिकानाहूय पप्रच्छ। कीदृशा नरकाः स्युरिति कैश्चिद्गर्भवासः, कैश्चन गुप्तिवासः, कैरपि दारिद्र्यमपरैः पारत(न्त्र्य ?)-मिति तैर्नरका आचचक्षिरे। राज्ञी तु मुखं मोटयित्वा तान् विसंवादिवचसो व्यस्राक्षीत्।

अथ नृपोऽन्निकापुत्राचार्यमाकार्य तदेवाप्राक्षीत्। तेन तु यादृशान् देव्य[1]दृशन्तादृशा एवोक्ता नरकाः। राज्ञी प्रोचे भगवन्! भवद्भिरपि किं स्वप्नो दृष्टः कथमन्यथे[2]त्थं वित्थ। सूरिरवदद् भद्रे! जिनागमात्सर्वमवगम्यते। पुष्पचूलाऽवोचद् भगवन्! केन कर्मणा ते प्राप्यन्ते गुरुरगणात्—भद्रे! महारम्भ-परि[3]ग्रहैर्गुरुप्रत्यनीक[4]तया पञ्चेन्द्रियवधान्मांसाहाराच्च तेष्वङ्गिनः पतन्ति। क्रमेण स सुरस्तस्यै स्वर्गा[5]नदर्शयत् स्वप्ने। राज्ञा[6] तथैव पाखण्डिनः पृष्टास्तानपि व्यभिचारिवाचो विसृज्य भूपस्त-मेवाचार्यं स्वर्गस्वरूपमप्राक्षीत्। तेनापि यथावत्त्वोदिते स्वर्गाप्ति-कारणमपृच्छद्राज्ञी। तत सम्यक्त्वमूलौ गृहियतिधर्मावादिशा-म्मुनीशः। प्रतिबुद्धा च सा लघुकर्मा नृपमनुज्ञापयति स्म प्रव्रज्यायै। सोऽप्यूचे यदि मद्गृह एव भिक्षामादत्से तदा प्रव्र[7]ज। तयोरीकृते नृपवचसि सा सोत्सवमभूत्तस्याचार्यस्य शिष्या गीतार्था

---

१ 'देव्यदर्शीत्' A. 'देव्यादर्शीत्' B. २ 'अन्ये(न्यथे ?)त्थं' B.
३ 'पग्गट(ग्र ?)हैः' B. ४ 'प्रत्यनीकतयाः(या ?)' B.
५ 'स्वर्गाद(दौ ?)नदर्शयत्' B. ६ 'तथैव राज्ञा' B.
७ 'प्रव्रजः(ज ?)' B

च। अन्यदा भाविदुर्भिक्षं श्रुतोपयोगात् ज्ञात्वा सूरिर्गच्छं देशान्तरे प्रैषीत्। स्वयं तु परिक्षीणजङ्घाबलस्तत्रैवास्थात्। भक्तपानं च पुष्पचूलान्तःपुरादानीय गुरवेऽदात्। क्रमात्तस्या गुरुशुश्रूषाभावनाप्रकर्षात् क्षप[ण ?]कश्रेण्यारोहात् केवलज्ञानमुत्पेदे। तथापि गुरुवैयावृत्त्यान्न निवृत्ता यावद्धि [१]गुरुणा न ज्ञातं यदयं केवलीति तावत् पूर्वप्रयुक्तं विनयं केवल्यपि नात्येति। सापि यद् यद्गुरोरुचितं रुचितं च तत्तदन्नादि संपादितवती। अन्यदा वर्षत्यब्दे सा पिण्डमाहरत् गुरुभिरभिहितं वत्से! श्रुतज्ञासि किमिति वृष्टौ त्वयानीतः पिण्ड इति। साऽभाणीद्भगवन्! यत्राध्वनि अप्कायोऽचित्त एवासीत्तेनैवायासिषमहं कुतः प्रायश्चित्तापत्तिः(?)। गुरुराह—छद्मस्थः[२] कथमेतद्वेद? तयोचे केवलं ममास्ति। ततो मिथ्या मे दुष्कृतं केवल्या शातित इति ब्रुवन्नपृच्छत्तां गच्छाधिपः—किमहं सेत्स्यामि न वेति। केवल्यूचे मा कृद्भमधृतिम्; गङ्गामुत्तरतां वो भविष्यति केवलम्। ततो गङ्गामुत्तरीतुं लोकैः सह नावमारोहत्सूरिः। यत्र यत्र स न्यषीदत् तत्र तत्र नौर्मङ्क्तुमारेभे। तदनु मध्यदेशासीने मुनीने सर्वापि नौर्मङ्क्तुं लग्ना। ततो लोकैः सूरिर्जले क्षिप्तः। दुर्भगीकरणविराद्धया प्राग्भवपत्न्या व्यन्तरीभूतयान्तर्जलं शूले निहितः। शूलप्रोतोऽप्ययमप्कायजीवविराधनामेवाशोचयन्नात्मपीड़ां क्षप[ण]कश्रेण्यारूढोऽन्तकृत् केवलीभूय सिद्धः। आसन्नैः सुरैस्तस्य निर्वाणमहिमा चक्रे। अत एव तत्तीर्थं 'प्र[३]याग' इति जगति पप्रथे[४]।

---

१ 'गु[रु ?]णा' A. २ 'छद्मस्थ' B.

३ 'प्रयो(या ?)ग' A. ४ 'पं(प ?)प्रथे' B.

प्रकृष्टो यागः पूजा अर्चेति[१] प्रयागः। शूलाप्रोतलग्नतामुगतिकतया चाद्यापि परसमयिनः क्रकचं स्वाङ्गे दापयन्ति [२]तत्रावटस्य तत्र गणशस्तुरुष्कैश्छिन्नोऽपि मुहुर्मुहुः प्ररोहति।

सूरेः करोटिर्यादोभिस्तोद्यमानापि जलोर्मिभिर्नदीतीरं नीता। इतस्ततो लुठन्ती च शुक्तिवन्नदीतटे क्वापि शुभ्रविषमे प्रदेशे विलग्य तस्थौ। तस्य च करोटिकर्परस्यान्तः कदाचित्पाटलाबीजं न्यपप्तत्। क्रमात् करोटिकर्परं भित्त्वा दक्षिणहनोः पाटला-तरुरुद्गतो विशालश्चायमजनि। तदत्र पाटलिद्रोः प्रभावाच्चाष-निमित्ताच्च नगरं निवेश्यताम्, आशिवाशब्दं च सूत्रं दीयताम्। ततो राज्ञादिष्टा नैमित्तिकाः पाटलां पूर्वतः कृत्वा पश्चिमां तत उत्तराम्, ततः पुनः पूर्वां ततो दक्षिणां शिवाशब्दावधिं गत्वा [३][सूत्र]मपातयन्नेवं चतस्रः (चतुरस्रः?) पुरस्य [४]सन्निवेशो बभूव। तत्राङ्किते प्रदेशे पुरमचीकरन्नृपः। तच्च पाडली(टला?)नाम्ना पाटलिपुत्रं पत्तनमासीत्। असमकुसु[५]मबहुलतया च कुसुम-पुरमित्यपि रूढम्। तन्मध्ये श्रीनेमिचैत्यं राज्ञाकारि। तत्र पुरे गजाश्वरथशालाप्रासादसौधप्रका[६]रा(प्राकार?)गोपु[७]रपण्यशाला-सत्रागारपौष[८]धागाररम्ये चिरं राज्यं जैनधर्मं चापालयदुदायि-नरेन्द्रः।

---

१ 'अर्चेति (ति)' B. २ 'तत्र वटस्य' इति A. पुस्तके नास्ति।

३ '[सूत्र]मपातयन्' A. B. ४ 'सन्निवेशे(शो?)' A.

५ 'कुसुमबहुलतया च' इति A. पुस्तके नास्ति।

६ 'प्राकार' B. ७ 'गोपुर[प?]ण्यशाला' B.

८ 'पो(पौ)षधागार' A. B.

तस्मिन्नुपात्तपोषधेन्यदोदायिमारकेण स्वर्गातिथ्यं प्रापिते नापितग[1]णिकासुतो नन्दः श्रीवीरमोक्षात् षष्टिसंवत्सर्यामती-तायां क्षितिपतिरजनि। तदन्वये सप्त नन्दा नृपा जाताः। नवमनन्दे राजनि परमार्हतकल्पकान्वयी शकटालो मन्त्र्यभूत्। तस्य पुत्रौ स्थूलभद्र-श्री(श्रि ?)यकौ, सप्त च पुत्र्यो यक्षा-यक्षदत्ता-भूता-भूतदत्ता-एणा-रेणा-वेणाख्याः क्रमा-देकादिसप्तान्त-वारश्रुतपाठिन्योऽज[2]निषत।

तत्रैव पुरे कोशा वेश्या तन्नामिरूपकोशा चाभूताम्।

तत्रैव च चाणि(ण ?)क्यः सचिवो नन्दं समूलमुन्मूल्य मौर्यवंश्यं श्रीचन्द्रगुप्तं न्यवीविशद्विशांपतित्वे। तद्वंशे तु बिन्दुसारो-ऽशोक[3]श्रीः कुणालसूनुस्त्रिखण्डभरताधिपः परमार्हतोऽनार्य-देशेष्वपि प्रवर्तितश्रमणविहारः संप्रतिमहाराजश्चाभवत्।

मूलदेवः सकलकलाकलापज्ञोऽचलसार्थवाहो महाधनो देवदत्ता च गाणि[4]क्यमाणिक्यं तत्रैव प्रागवसन्। उमास्वाति-वाचकश्च कौभीषणिगोत्रः पञ्चशत-संस्कृतप्रकरण-करण-प्रसिद्ध-स्तत्रैव तत्त्वार्थाधिगमं सभाष्यं[5] व्यरचयत्। चतुरशीतिर्वाद-शालाश्च तत्रैव विदुषां परितोषाय पर्यणंसिषुः।

तत्रैव चोत्तुङ्गतरङ्गोत्सङ्गितगगनाङ्गणापरिवहति महानदी गङ्गा।

---

१ 'नापित[ग ?]णिकासुतो' A. २ 'अजनिषत्(त ?)' A.

३ 'अशोकः(क ?)' श्रीः। ४ 'गाणिक्यं(क्य ?)माणिक्यं' A.

५ 'सं(स ?)भाष्यं' B.

तत्रैव चोत्तरा(र?)दिशि विपुलं वालुकास्थलं नातिदूरे यत्रारूढ़ा कल्की प्रातिपदाचार्यप्रमुखसङ्घश्च सलिलप्लवान्निस्तरीता ।

तत्रैव च भविष्यति कल्किर्नृपति[1]र्धर्मदत्त-जितशत्रुमेघ-घोषादयश्च तद्वंश्याः ।

तत्रैव च विद्यन्तेऽन्तर्निहितनन्दसत्क-नवनवतिद्रव्यको(ट्यः) पञ्च स्तूपाः येषु धनधनायया श्रीलक्ष्मणावतीसुरत्राणस्तांस्तानुपाक्रमतोपक्रमांस्ते च तत्सैन्योपप्लवायैवाकल्पन्त ।

तत्रैव[2] विहृतवन्तः श्रीभद्रबाहुमहागिरिसुहस्तिवज्रस्वाम्यादयो युगप्रवरागमाः । विहरिष्यन्ति च प्रातिपदाचार्यादयः ।

तत्रैव महाधनधनश्रेष्ठिनन्दना रुक्मिणी श्रीवज्रस्वामिनं पतीयन्ती प्रतिबोध्य तेन भगवता निर्लोभचूडामणिना प्रव्राजिता ।

तत्रैव सुदर्शनश्रेष्ठी म[3]हर्ष्यषि(हर्षि?)रभयाराज्ञा व्यन्तरीभूतया भूयस्तरमुपसर्गितोऽपि न क्षोभमभजत(त्?) । तत्रैव स्थूलभद्रमहामुनिः[4] षड्रसाहारपरः कोशायाश्चित्रशालायामुत्सादितमदनमदश्चकार वर्षारात्रचतुर्मासीम् । सिंहगुहावासिमुनिरपि तं स्पर्द्धिष्णुस्तत्रैव कोशया तदानीतरत्नकम्बलस्य चन्दलि(नि?)काप्रक्षेपेण[5] प्रतिबोध्य पुनश्चारुतरां चरणश्रियमङ्गीकारितः ।

---

१ 'कल्किान्नृपति धर्मदत्त' B. २ 'तत्रैव च' A.

३ 'महर्ष(र्ष ?)षिः' A. ४ 'महामुनि[ः]' B.

५ 'प्रक्षेप(पे ?)णे (ण ?)' A.

तत्रैव द्वादशाब्दे दुर्भिक्षे[1] गच्छे देशान्तरं प्रति प्रोषिते[2] सति **सुस्थिताचार्य**शिष्यौ क्षुल्लकावदृश्यी[3]करणाञ्जनाक्तचक्षुषौ **चन्द्रगुप्त**नृपतिना सह बुभुजाते कियन्त्यपि दिनानि । तदनु गुरुप्रत्युपालम्भाद्विष्णुगुप्त एव तयोर्निर्वाहमकरोत् । तत्रैव **श्रीवज्र-स्वामी** पौरस्त्रीजनमनःसंक्षोभरक्षणार्थं प्रथमदिने सामान्यमेव रूपं विकृत्य द्वितीयेऽह्नि चाहो ! नास्य भगवतो गुणानुरूपं रूपमिति देशान्त(शना ?)रसहृतहृदयजनमुखात् संलापान् श्रुत्वाऽनेकलब्धिमान् सहजमप्रतिरूपं रूपं विकुर्व्य सौवर्णसहस्रपत्रे निषद्य देशनां विधाय राजादिजनताममोदयत् ।

तस्यैव पुरस्य मध्ये सप्रभावातिशया मातृदेवता आसंस्तदनु-भावा[4]त्तत्पुरं परैराग्रहवद्भिरपि न खलु ग्रहीतुमशाकि । चाणि(ण ?)क्यवचसोत्पाटिते पुनर्जग्मेमातृमण्डले गृहीतवन्तौ **चन्द्रगुप्तपर्वतकौ** । एवमाद्यनेकसंविधानकनिधाने तत्र नगरेऽष्टा-दशसु(सु ?) विद्यासु स्मृतिषु पुराणेषु च[5] द्वासप्ततौ कलासु **भरत-वात्स्या-यन-चा[6]णाक्य**लक्षणे रत्नत्रये मन्त्रयन्त्रतन्त्रविद्यासु रसवादधातुनिधिवादाञ्जनगुटिकापादप्रलेपरत्नपरीक्षा-वास्तुविद्या-पुंस्त्रीगजाश्ववृषभादिलक्षणेन्द्रजालादिग्रन्थेषु काव्येषु च निपुणचणास्ते ते पुरुषाः प्रत्यूषुः प्रत्यूषकीर्तनीयनामधेयाः ।

आर्यरक्षितोऽपि हि चतुर्दशविद्यास्थानानि तत्रैवाधीत्य **दशपुर**मागमत् । आढ्यास्तु तत्रैवंविधा वसन्ति स्म, ये

---

१ 'दुर्भिभि(भि ?)क्षे' B.   २ 'प्रोषिते' A. B.

३ 'अदृश्यीकरणाञ्जन' B.   ४ 'तदनुभावा।...त् पुरं' B.

५ 'च' इति B. पुस्तके नास्ति ।   ६ 'चाणा(णा ?)क्य' A.

योजनसहस्रगमने यानि गजपदानि भवेयुस्तानि प्रत्येकं स्वर्णसहस्रेण पूरयितुमीशते। अन्ये च तिलानामा[1]ढक उप्ते प्ररूढे सुफलिते यावन्तस्तिला: स्युस्तावन्ति हेमसहस्राणि बिभ्र[2]ति गृहे। अपरे च घनागमप्रव[3]हद्गिरिनदीवारिपूरस्यैकदिनोत्पन्नेन गवां नवनीतेन संवरं विरचय्य पयोरयं स्खलयितुमलम्। अन्यतमे चैकाहजात-जात्यनवकिशो[4]राणां समुद्भूतैः स्कन्धकेशै:[5] पाटली(लि?)पुत्रं समन्तादिष्टयितुमचेष्टन्त। इतरे च शालिरत्नदयं वेश्मनि बिभरांबभुवुस्तत्रैकशालिर्भिन्नभिन्नशालिबीजप्रसूतिमानन्यश्च गर्द-भिकाशालि[6]र्यो लूनलूनः पुनः पुनः फलति।

गौडदेशावतंसस्य श्रीजिनप्रभसूरयः।
कल्पं पाटलिपुत्रस्य रचयांचक्रुरागमात्॥

इति श्रीपाटलिपुत्रपुरकल्पः॥

ग्रं. १२५ अ. १८[7]॥

---

१ 'तिला[ना?]माढक' A.

२ 'बिभ्र(भ्र?)ति' A; 'बिभ्र...' B.

३ 'प्रवर(वह?)द्' A. ४ 'का(कि?)शोराणां' A.

५ 'कै(के?)शैः' B. ६ 'शालियो(र्यो?)' B.

७ 'अ. १८' इति A. पुस्तके नास्ति।

दुहसरितारणवत्थी सावत्थी सयलसुक्खपसवत्थी ।
नमिऊण संभवजिणं तीसे क[1]प्पे(प्पे)मि कप्पलवम् ॥ १ ॥

अत्थि इहेव दाहिणड्ढभारहवासे अगणिज्जगुणगणविसए कुणालाविसए सावत्थी नाम नयरी संपइकाले 'महे[2]ठि'-त्ति रूढा । जत्थ अज्ज वि घणगहणवणमज्झट्ठियं[3] सिरिसंभवनाहपडिमाविभूसियं गयणग्गलग्गसिहरं पासट्ठियजिणबिंबमंडियदेवउलियाअलंकरियं जिणभवणं चिट्ठइ पायारपरियरियं । तस्स चेइयस्स दुवारअदूरसामंते विलिरउम[4]सिरअतुल-पल्लवसिणिद्धच्छाओ महल्लसाहाभिरामो रत्ता[5]सोअपायवो दीसइ । तस्स य जिणभवणस्स पओलीए जे कवाडसंपुडा आसि ते माणिभद्दजक्खाणुभावाओ सूरिए अत्थमुविंते सयमेव लग्गंति म्ह उदिए य दिणयरे सयमेव उग्घडन्ति म्ह । अन्नया कलिकालदुल्ललिअवसेण अल्लावदीणसुरत्ताणस्स म[6]लिक्केण हव्वसनामगेणं बहडाइच्चनगराओ आगंतूण पायारभित्तिकवाडाइ कइवयबिंबाणि अ भग्गाणि । मंदप्पभावा हि भवंति दूसमाए अहिट्ठायगा । तहा तस्सेव चेइयस्स सिहरे जत्तागयसंघेणं कीरमाणे न्हवणाइमहूसवे आ[7]गंतूण एगो चित्तगो उवविसइ । न[8] य कस्स वि भयं जणेइ । जाव मंगलपईवे कए सट्ठाणमुवगच्छइत्ति ।

---

१ 'कप्पेमि' A. B. २ 'महिठित्ति' B.
३ 'मज्झट्ठियं' A. ४ 'उक्करसिरं' A. B.
५ 'रे(र ?)त्तासो' A. ६ 'मलिक्केण' B.
७ 'अ(आ ?)गंतूण' A. ८ 'नायकस्स' A.

इत्थेव नयरीए बुद्धायणं चिट्ठइ जत्थ समुद्दवंसीया करावल्ल[1]नरिंदकुलसंभूया रायाणो बुद्धभत्ता अज्जवि नियदेवयस्स पुरओ महग्घमुल्लंपल्लाणियं[2] अलंकियं विभूसियं महातुरंगमं ढोअंति। जंगुलीविज्जा य इत्थेव बुद्धेण ससंपदाया पयासिआ महप्पभावा। इत्थेव निप्फज्जंति नाणाविहा साली जेसिं सव्वसा[3]लिजाईणं इक्किक्के कणंमि निखिप्पमाणे आसिहं भरिज्जइ महंतं खोरयं। इत्थेव भयवं संभवसामी चवणजम्मणनिक्खमण[4]-केवलनाणुप्पत्तिकल्लाणगाइं ससुरासुरनरभवणमणरंजणा[5]इं अकारि। कोसंबीपुरीए उप्पन्नो जियसत्तुनिवसचिवकास[व!]पुत्तो जसाकु[6]क्खिसंभूओ कविलो महरिसी जणयम्मि विवन्ने विज्जाअहिज्जण[7]त्थं एयं नय[8]रिं(रं) समागओ पिउ-मित्तइंददत्तउवज्झायसयासे। सालिभद्दइब्भदासचेडीवयणेणं दोमासयसुवन्नकए वसंतो कमेण सयंबुद्धो जाओ, पडिबोहिऊण पंचसयचोरे सिद्धो अ।

इत्थेव तिंदुगुज्जाणे पंचसयसमणअज्जिआसहस्सपरिवुडो[9] पढमनिन्हवो जमाली ठिओ। ढंकेण कुंभयारेण पढमं नियसाला संठिआ भगवओ धूआ पिअदंसणा अज्जा

१ 'कराचल्ल' T. B. २ 'पल्लाणी(णि?)यं' A.

३ 'सुवं(सव्व?)सालि' A.

४ 'निक्खमण' इति A. पुस्तके नास्ति।

५ 'रंजणाइ' A. ६ 'जसाजक्खि' B.

७ 'अहिज्जणत्थं' A. ८ 'नयरिं' A. 'नयरं' B.

९ 'परिवुडो' A. B.

साडियाएगदेसे श्रंगारं क्षोट्टू(ढू?)[१]ण 'कयमाणे क[२]डि' त्ति वीरव[३]यणं पडिवज्जाविया । तीए य सेससाहुणो साहुणो पडिबोहिया सामिं चेव श्रल्लीणा । एगो चेव जमाली विप्पडिवन्नो ठिश्रो ।

इत्येव तिन्दुगुज्जाणे केसीकुमारसमणो गणहरो भयवया गोश्रमसामिणा कुट्ठयउज्जाणाश्रो श्रागंतूण पडुप्परं संवायं च काउं पंचजामं धम्ममंगीकारिश्रो ।

इत्येव एगं वासारत्तं समणो भयवं महावीरो ठिश्रो खंड(द)पडि[४]माए सक्केण य पूइश्रो चित्तं च तवोकम्ममकासी ।

इत्येव जियसत्तुधारी(रि?)णीपुत्तो खंदगायरिश्रो उप्पन्नो । जो पंचसयसीससहिश्रो पालगेणं कुंभयारकडनयरे जंतेण पीलि[५]श्रो । इत्येव जियसत्तुरायपुत्तो भद्दो नाम पव्वइत्ता पडिमं पडिवन्नो विहरंतो वेरज्जे संपत्तो चा(चो?)रिश्रो त्ति काऊण गहिश्रो रायपुरिसेहिं तच्छियंगो खारं दाउं कक्कडदब्भेहिं वेढिश्रो मुक्को सिद्धो श्र । जहा रायगिहाइसु तहा इत्थ वि नयरीए बंभदत्तस्स हिं[६]डी जाया । इत्येव खुड्डुगकुमारो श्रजियसेणायरियसीसो जणणीमयहरियाश्रायरियउवज्झायनिमित्तं बारसबारसवरिसाणि दव्वश्रो सामन्ने ठिश्रो । नट्टविहीए सुड्डुगाइयं सुट्ठुवाइयमिच्चा[७]इगीइ[८]यं सोउं जुवरायसत्थवाहभज्जा-

---

१ 'क्षोढ्ण' A. B. २ 'काड त्ति' B,

३ 'वीरवयणं पडिवन' । ४ 'खंडपडिमाए' A. B.

५ 'पालिश्रो' B. ६ 'बंभदत्तहिंडी' A.

७ 'मिच्चाइं' B. ८ 'गीइय' B.

मज्झमिं ठेहिं समं पडिबुद्धो। एवमाईणं अणेगेसिं संविग्गा[1]णा-
गरयणाणं उप्पत्तीए एसा नयरी रोहणगिरिभूमिव्व।

सावत्थिमहातित्थस्स कप्पमेयं पढंतु विउसवरा।
जिणपवयणभत्तीए इय भणइ जिणप्पहो सूरी॥ १॥

इति श्रीश्रावस्तीकल्पः॥ ग्रं. ४२॥

---

१ 'संविग्गा[णा]गरयणाणां' B.

नत्वा तत्त्वाख्यायिनं श्री[1]सुपार्श्वं
श्रीपार्श्वं च न्यस्थितानिघ्नविघ्नम् ।
वा[2]णार(राण)स्यास्तीर्थरत्नस्य कल्पं
जल्पामोऽसत्कल्पनापोढकल्पम् ॥ १ ॥

अस्त्यत्रैव दक्षिणे भारतार्धे मध्यमखण्डे काशिजनपदालंकृति-रुत्तरवाहिन्या त्रिदशवाहिन्यालंकृतधनकनकरत्नसमृद्धा वाणा-(राण)रसी नाम नगरी गरीयसामद्भुतानां वि(नि?)धानम् । वरणा नाम्नी सरिदसिनाम्नी च । द्वे अपि सरितावस्यां गङ्गामनुप्रविष्टे इति वाराणसीति नैरुक्तं नामास्याः प्रसिद्धम् ।

अस्यां सप्तमो जिनसत्तमः श्रीमान् सुपार्श्वऐक्ष्वाकु-प्रतीष्ट[3]महीपतिमहिष्याः पृथ्वीदेव्याः कुक्षाववतीर्य जन्म(?)-मुपादित । त्रिभुवनजनवादितयशःपटहः स्वस्तिकलाञ्छितद्विशतधनु-रुच्छ्रायकाञ्चनच्छायकायः क्रमेण प्राज्यराज्यश्रियमनुभूय भूयः सांवत्सरिकं दानं प्रदाय सहस्राम्रवणे दीक्षां च कक्षीकृत्य विहृत्य छद्मस्थावस्थया नवमासौं केवलममलमासाद्य संमेतगिरि-मेत्य निर्वृतः ।

त्रयोविंशश्च जिनेशः श्रीपार्श्वनाथ ऐक्ष्वाकाश्वसेनरवेन सूनुर्वामाकुक्षिसंभवः पन्न[4]गलक्ष्मा नवकरोच्छ्राय-नीलच्छविवपु-रात्तजन्माश्रमपदोद्याने कौमार एवोपात्तचारित्रभारः केवलमुत्पाद्य तस्मिन्नेव शैले शैले[5]शीमवाप्य सिद्धः । अस्यामेव कुमारकाले

---

१ 'श्री[सु]पार्श्वं' A.   २ 'वाणारस्या' A. B.

३ 'प्रति(ती ?)ष्ट' A.   ४ 'पन्नगलच्छ्मा(क्ष्मा ?)' B.

५ 'शैलेसी(शी ?)म्' A. B.

भगवानेष एव मणिकर्णिकायां पञ्चाग्नितपस्तप्यमानात्कमठक्षपे-रा[1]यतो भाविनीं विपदमात्मनो विविदिवानथन्तर्दारुण-ज्वलज्ज्वालाभिरर्द्धदग्धं दन्दशूकं जनन्या जनानां च संदर्श्य कु[2]पथमथनमकार्षीत्। अस्यां काश्यपगोत्रौ चतुर्वेदौ षट्कर्म-कर्मठौ समृद्धौ यमलभ्रातरौ जयघोषविजयघोषाभिधानौ द्विजवरावभूताम्। एकदा जयघोषः स्नातुं गङ्गामगात्तत्र पृदा-कु[3]णा ग्रस्यमानं भे[4]कमेकमालोकयत्। सर्पं च कुललेनोत्क्षिप्य भूमौ पातितमद्राक्षीत्। सर्पमाक्रम्य स्थितं कु[5]ललं तमेव चण्ड-ग्रासैः खादन्तं सर्पं च कुललवशगतमपि चीत्कुर्वाणमण्डूकभक्षिणं[6] वीक्ष्य प्रतिबुद्धः। प्रव्रज्य क्रमादेकरात्रिकीं प्रतिमां प्रपद्य विहरन् पुनरिमां[7] नगरीमागात्। मासक्षपणपारणके[8] यज्ञपाटकं प्रविष्टः। तत्र विप्रैर्भैक्षमदित्सुभिः प्रतिषिद्धः। ततः श्रुताभिहित-चर्यामुपदिश्य भ्रातरं विप्रांश्च प्रत्यबूबुधद्। विरक्तो विजयघोषः प्राव्राजीद्(त्।)। द्वावपि मोक्षं प्रापतुः। अस्यां नन्दाभिधानो नाविकस्तरपण्यजिघृक्षया मुमु[9]क्षुं धर्मरुचिं विराध्य तस्य हुंकारेण भस्मीभूय गृहकोकिलहंससिंहभवान् यथासंख्यं सभामृत-गङ्गातीराञ्जनागिरिष्ववाप्य तस्यैवानगारस्य तेजोनिसर्गेण विपद्य वास्यामेव पुर्यां बटुर्भूत्वा तथैव निधनमधिगत्यास्यामेव राजा

---

१ 'आयता(तौ ?)' A. 'आय[तौ?]' B.

२ 'कुपथ[मथ ?]नम्' A. ३ '... दाकुणा' B.

४ '... कमेकं' B. ५ '... कुला(ल ?)लम्' A. B.

६ 'भक्ष(क्षि ?)णं' A. ७ 'इमा(मां ?)' B.

८ 'पार[ण ?]के' B. ९ 'मुमुक्षं(क्षुं ?)' A. B.

समजनिष्ट। जातिस्मरः सार्द्धं श्लोकमकरोत्। अन्येद्युस्तत्रैवागतं तमनगारं समस्यापूरणादिज्ञायाभयथा च न पुरस्सरमुपगत्य च क्षमयित्वा परमार्हतोऽभूत्। सिद्धश्च धर्मरुचिः क्रमात्। सा चेयं सम[1]स्या—

गंगाए न(ना ?) विओ नंदो सभाए घरकोइलो।
हंसो मयंगतीराए सीहो अंजणपव्वए॥
वाणार(राण !)सीए वडुओ राया तत्थेव आयओ।
प(ए?)एसिं घायगो जोउ[2](आओ) सो इत्थेव समागओ॥ इति।

अस्यां संवाहनस्य नरपतेः सातिरेके कन्यासह[3]स्रे सत्यपि परनृपतिपृतनावेष्टितायां पुरि राज्यलक्ष्मीं गर्भस्थोऽप्यङ्गवीर-स्नातवान्।

अस्यां[4] मातङ्गर्षिर्बलनामाम्नृतगङ्गातीरे लब्धजन्मा तिन्दुकोद्याने स्थितवान्। गण्डी तिन्दुकं च यक्षं गुणग[5]णैर्हृत-हृदयमकार्षीत्। कौशलिकनृपदुहिता च भद्रा मलक्लि[6]न्नाङ्गं तमृषिं विलोक्य निष्ठ्यूतवती। ततस्तेन यक्षेणाधिष्ठिताङ्गी तेनैव मुनेर्वपुषि संक्रम्य परिणीता त्यक्ता च मुनिना। ततो रुद्रदेवेन यज्ञपत्नी कृता। मासक्षपणपारणे च भिक्षार्थमुपागतो मातङ्ग-मुनिर्द्विजातिभिरुपहस्य कदर्थ्यमानं तं प्रेक्ष्य भद्रयोपल[7]क्ष्य

---

१ 'समस्या—पूरणादिज्ञाया' इति लेखकदोषेण A. पुस्तके।
२ 'जोउ' A. 'आओ' B. ३ 'कन्या सहस्रेः(स्रे ?)' A.
४ 'अस्यांग ? मातङ्गऋषिः' A.
५ 'गुणगणे(णैः ?)र्हृ(हृं ?)त' A.
६ 'क्लिन्नागं(ङ्गं ?)' A. ७ 'उपल...' A.

बोधितास्तं क्षमयामासुर्ब्राह्मणाः। प्रत्यक्षाभयंश्च भक्त्यादेर्विदधे विबु[1]धैर्गन्धोदकवृष्टिः पुष्पवृष्टिर्दुन्दुभिवादनं वसुधारापातश्च।

अस्यां

बाणा(राण ?)रसीय(प ?)कोट्ठए पासे गोवालिभद्दसेणे य।
नंदसिरी पउमद्दह रायगिहे सेणि(णि ?)ए वीरे॥
बाणा(राण !)रसीनय[2]रीए अणगारे धम्मघो[3]सधम्मजसे।
मासस्स य पारणए गोअ(उ ?)लगंगा य अणुकंपा॥

एतदावश्यकनिर्युक्तिस्थं संविधानकद्वयमजनि। तथा हि—

अत्रैव पुर्यां भद्रसेनो जीर्णश्रेष्ठी। तस्य भार्या नन्दा। तयोः पुत्री[4] नन्दश्रीर्वरकरहिता। अत्रैव कोष्ठके चैत्येऽन्यदा पार्श्वस्वामी समवासरत्। नन्दश्रीः प्राव्राजीद्गोपाल्यार्यायाः शिष्यतयार्पिता। सा च पूर्वमुग्रं विहृत्य पश्चादवसन्नीभूता हस्तपादाद्यक्षालयत्। साध्वीभिर्वार्यमाणा तु विभक्तायां वसतौ स्थिता। तद[5]नालोच्य मृता क्षुल्लहिमवति पद्महद(दे ?)[6]श्रीदेवी जज्ञे देवगणिका। भगवतः श्रीवीरस्य राजगृहे समवसृतस्याग्रे नाट्यविधिमुपदर्श्य गता। अन्ये त्वाहुः—करिणीरूपेण वातनिसर्गमकरोत्। श्रेणिकेन तस्याः स्वरूपे पृष्टे भगवानाख्यत् तस्याः पूर्वभवावसन्नतावृत्तम्।

---

१ 'विं(वि ?)बुधैः' A. २ 'नयरी[ए ?]' A. B.
३ 'धंमघो(घो ?)स' B. ४ 'पु[त्री ?]नन्दश्रीः' A. B.
५ 'तदु(द ?)नालोच्य' B. ६ 'पद्मह्र(हृ ?)दश्रीः' B.

अत्रैव पुर्यां **धर्मघोषधर्मयशसौ** द्वावनगारौ वर्षारात्रमवस्थाताम्। तौ मासं मासं क्षपणेनास्ताम्। अन्यदा चतुर्थपारणके तृतीयपौरुष्यां विहाराय प्रस्थितौ शारदातपेनार्तौ तृषितौ गङ्गामुत्तरन्तौ मनसापि नाम्भ ऐच्छतामनेषणीयमिति। देवता तद्गुणावर्जिता गोकुलं विकुर्व्य गङ्गोत्तीर्णौ तौ दध्यादिभिरुपन्यमन्त्रयत्। तौ दत्तोपयोगौ ज्ञा[1]तवन्तौ यथेयं मायेति प्रत्यषेधताम्। पुरःप्रस्थितयोस्त[2]योरनुकम्पया वार्दलं व्यकार्षीद्देवता। तौ चार्द्रायां भूमौ शीतलवाताप्यायितौ ग्रामं प्राप्य शुद्धो[3]ञ्छमादिषा(ग्रा?)तामिति।

श्रीमदयोध्यायामिक्ष्वाकुवं[4]श्यः श्री[5]**हरिश्चन्द्रो** महानरेन्द्रस्त्रिशङ्कुपुत्र **उशीनरनृपसुता(त?)या** **सुतारादेव्या** **रोहिताश्वेन** च पुत्रेण सहितः सुखमनुभवंश्चिरमशा[स?]त् काश्यपीम्। एकदा सौधर्माधिपतिर्दिवि दिविजपरिषदि तस्य सत्त्ववर्णनामा(म)करोत्। तदश्रद्दधानावुभौ गीर्वाणौ **चन्द्रचूडमणिप्रभ**नामानौ वसुंधरामवतीर्णौ। तयोरेको वनवराहरूपं विकृत्यायोध्यापरिसरस्थितशक्रावतारचैत्याश्रमं सं(स?)संर[6]म्भं भु(भ?)ङ्क्तुं[7] प्रववृते। अन्येद्युः सदसि सिंहासनस्थितो **हरिश्चन्द्रमहीन्द्र**स्तमाश्रमोपप्लवं शूकरोपज्ञं श्रुत्वा तत्र गत्वा बाणप्रहारेण तं वराहं प्रहतवान्। तस्मिंश्च समरे तु(ऽन्त?)र्हिते गर्हितेतरचरितः स यावत्तं प्रदेश[8]मविशत्तावत्तत्र हरिणीं स्वबाणप्रहतां तस्याः स्फुरन्तं च

---

१ 'यान्त(ज्ञात?)वन्तौ' A. २ 'तयोः' इति A. पुस्तके नास्ति।
३ 'शुद्धोञ्छ(द्धोञ्छ?)' B. ४ 'इक्ष्वा[कु?]वंश्यः' B.
५ '[श्री?]हरिश्चन्द्रो' B. ६ '[स?]संरम्भ' A.
७ 'भङ्क्तुं' B. ८ 'प्रवे(दे?)शमव(वि?)शन्' A. B.

गलितं गर्भं निभाल्य कपिञ्जलकुन्तलमित्राभ्यां सह पर्यालोच्य भ्रूणघ्नं स्वं शोचयन् प्रायश्चित्तग्रहणार्थं कुलपतिमुपसृत्य नमस्कृत्य गृहीत्वा चाशिषं यावदास्ते तावद्वञ्चना[1] नाम कुलपतिकन्यका तुमुलमतुलमकार्षीत्। व्याहार्षीच्च ततोऽ(तात!?) (अ)नेन पापीयसा मन्मृगी हता। तन्मरणे च मम मन्मातुश्च मरणं भविष्यतीति निशम्य कुपि[2]तः कुलपतिर्नृपतये। ततस्तत्पदोर्निपत्य नरपतिरलपत्। प्रभो! सकलामपि वसुधां प्रतिगृह्य मामेतस्मादेनसो मोचय वञ्चनायाश्च मरणनिवारणाय हेम[3]लक्षं दास्यामीति। तेनाप्यो[4]मिति प्रति[5]पन्ने सति कौटिल्यमृषिं सह कृत्वा नृपः स्वपुरीमा(म?)गात्। ततो वसुभूतेर्मन्त्रिणः कुन्तलस्य च सुहृदस्तत्स्वरूपमावेद्य कोशान्निष्कलक्षमानाययत्। ततः स्मित्वा तापसः माङ्गारको व्याकरोदस्मभ्यं जल[6]धिमेखलामखिलामिलां त्वमदाः। ततोऽस्म[7]दीयमेव वस्वस्मभ्यमेवं दीयत इति कोऽयं न्यायः। अथ वसु[8]भूतिः किमपि ब्रुवाणः कुलपतिना शापादकारि कीरः, कुन्तलस्तु गृहगाम्नः। तौ च वनम[9]ध्येऽवसताम्। राजा च मासमवधिं मार्गयित्वा रोहिताश्वमङ्गुलौ लगयित्वा सुतारया सह काशीं प्रति प्राचलत्। क्रमादिमां पुरीं प्राप्य संस्थायां

---

१ 'वन्द(ञ्च?)ना' A. २ 'कुपिता(तः?)' A.

३ 'है(हे?)मलक्ष्यं(क्षं?)' A. ४ 'तेनाप्योव(मि?)ति' B.

५ 'प्रतिपन्न(न्ने?)व(स?)ति' A. B.

६ 'जलधिपे(मे?)खलामखिलामिलाम्' A. B.

७ 'ततोऽस्मदीय[मेव वस्वस्मभ्यमेवं दीय]त इति' B.

८ 'वसुभूतिं(तिः?)' A. B. ९ 'अध्यवसतां' A. B.

स्थितः। तत्र शिरसि तृ[1]णं दत्वा वज्रहृदयविप्रहस्ते देवीं कुमारं च हेमषट्सहस्त्रया विचिक्रिये। सा तत्र खण्डनपेषणादिकर्माणि [2]निर्ममे। दारकश्च समित्पत्रपुष्पफलाद्याजहार। राज्ञि चिन्ताचान्तचेतसि कुलपतिः कनकं मार्गयितुमा(म?)गात्। दत्तं तस्मै राज्ञा काञ्चनसहस्रषट्कम्। कुलपतौ स्तोकमिति कुप्यत्यङ्गारकोऽवोचद्भोः! किमर्थं पत्नीमपत्यं च व्य(वि?)क्रीणीथाः। अन्यत्यं चन्द्रशेखरं नरेश्वरं किं[3] न याचसे वसु[4]लक्षम्। राज्ञोक्तमस्मत्कुले नेदं सिध्यति। डों[5]म्बस्यापि वेश्मनि कर्मकरत्वमुररीकृत्य दास्यामि तव काञ्चनमिति। ततः कर्म कर्तुं [6]प्रवृत्तश्चण्डालेन श्म(स्म?)शानरक्षणे नियुक्तः। ततः परं यथा (तथा?) ताभ्याममराभ्यामकारि मारिः पुर्यां यथा भूपादेशानीतमान्त्रिकेण राक्षसीप्रवादमारोप्य सुतारा मण्डलमानीय रासभमारोपिता। यथा शुकः पावके दत्तझम्पोपि न दग्धो यथा पितृवने वटोत्कलम्बितं नरं तटे च रुदन्तीं सुदतीं विलोक्य नरादिद्याधरापहारवृत्तमाकर्ण्य तमुन्मोच्य तत् स्थाने हरिश्चन्द्रः स्वं नियुज्य होमकुण्डे स्वमांसखण्डानि आर्पयद्। यथा कुण्डमध्यान्मुखं निर्गतम्। शृगालश्चारटत् तापसेन यथा व्रणरोहणमवनीपतेरकारि, यथा च पुष्पाणि गृ[7]ह्णन् रोहिताश्वो निः[8]शूकं दन्दशूकेन दष्टः। संस्कारयितुमानीताच्च तस्मात्

१ 'त्र(तृ?)णं' B. २ 'निर्मये(मे?)' A.
३ 'कि(किं?)न' B. ४ 'वलक्ष(सुल?)क्षम्' B.
५ '[डों]बस्यापि' B. ६ 'कर्तुं[प्रवृत्त]श्चण्डालेन' B.
७ 'गृह्ण(ह्ण?)न्' A. B. ८ 'निःशूकं(कं?)' B.

कण्ट(पिट ?)क[1]मयाचिष्ट नृपतिः । यथा च सत्त्वपरीक्षानिर्[2]वहन(ण)-
प्रमुदितप्रकटितनिजरूपचिदशकृतपुष्पवृष्टि जयजयध्वनिः सर्वजनैः
प्रशंसितः सात्त्विकशिरोमणिरिति । यथा च बहिर्मुखसुखादराशादि-
पुष्पवृष्टिपर्यन्तं दिव्यमायाविलसितमवबुध्य यावच्चेतसि चमत्कृतस्ता-
वत्स्वं स्वपुर्यां सदसि सिंहासनस्थं सपरिवारमपश्यत् । त[3]देतद्देवी-
कुमारविक्रयादि दिव्यपुष्पपर्या(र्य ?)वसानं श्रीहरिश्चन्द्रस्य चरित्रं
सत्त्वपरीक्षानिकषोऽस्यामेव पुर्यामजनि जनजनितविस्मयम् ।

यत्र [4]कासी(शी)माहात्म्ये प्रथमगुणस्थानीयैरभिधीयते
यद्वाराणस्यां कलियुगप्रवेशो नास्ति । तथाच प्राप्तनिधनाः कीट-
पतङ्गभ्रमरादयः कृतानेकचतुर्विधहत्यादिपा[5]प्मानोऽ[6]पि मनुष्या-
दयो वा शिवसायुज्य[7]मि[ति ?]प्रतीत्यादियुक्तिरिक्तं तद[8]स्माभिः
श्रद्धातुमपि दुःशकम्, किं पुनः कल्पे जल्पितुमित्युपेक्षणीय-
मेवैतत् । धातुवादरसवादखन्यवादमन्त्रविद्याविदुराः शब्दानुशासन-
तर्कनाटकालंकारज्योति[9]क(ज्यौतिष ?)चूडामणिनिमित्तशास्त्रसाहि-
त्यादिविद्यानिपुणाश्च पुरुषा अस्यां परिव्राजकेषु जटाधरेषु योगिषु
ब्राह्मणादिचातुर्वर्ण्ये च नैके रसिकमनांसि प्रीण[10]यन्ति । चतु-
र्दिगन्तदेशा[11]न्तरवास्तव्याश्चास्यां जना दृ[12]श्यन्ते सकल[13]कला-

---

१ 'कपिट(पट ?)कं' B.　२ 'निर्वट(ह ?)न(ण ?)' A. B.
३ 'तद्दे(दे ?)तद्' A.　४ 'कासी(शी ?)माहात्म्ये' A. B.
५ 'प(पा ?)प्मानो' A.　६ 'हि' B.　७ 'इश्च(प्र ?)ति' A.
८ 'तस्माद(दस्मा ?)भिः' B.　९ 'ज्योतिक (ज्यौतिष ?)' A. B.
१० 'प्रीयंयांति (णयन्ति ?)' B.　११ 'देशान्त[र ?]' B.
१२ 'दृश्य[न्ते ?]' A.　१३ 'सकल[कला ?]कलाप' A.

कलापपरिकलनकौतूहलिनः। वाराणसी चेयं संप्रति चतुर्धा-विभक्ता दृश्यन्ते। तद् यथा देववाराणसी यत्र विश्वनाथ-प्रासादः। तन्मध्ये चाश्मनं जैनं चतुर्विंशतिपट्टं पूजारूढमद्यापि विद्यते। द्वितीया[2] राजधानी वाराणसी यत्राद्यत्वे यवनाः[3]। तृतीया मदनवाराणसी चतुर्थी विजयवाराणसीति। लौकिकानि च तीर्थानि अस्यां क इव परिसंख्यातुमीश्वरः।

अन्तर्वणं दन्तखातं तडागं निकषा श्रीपार्श्वनाथस्य चैत्य-मनेकप्रतिमाविभूषितमास्ते। अस्याममलपरिमलभराकृष्टभ्रमर-कुलसंकुलानि सरसीषु नानाजातीयानि कमलानि। अस्यां च प्रतिपदमकुतोभयाः संचरिष्णवो निचाय्यन्ते शाखामृगा मृगधूर्ताश्च। अस्याः क्रोशत्रितये धर्मेक्षानाम संनिवेशो यत्र बोधिसत्त्वस्योच्चैस्तर-शिखरचुम्बितगगनमायतनम्। अस्याश्च सार्धयोजनद्वयात् परत-श्चन्द्रावती नाम नगरी यस्यां श्रीचन्द्रप्रभोर्गर्भावतारादि-कल्या[4]णि(ण)कचतुष्टयमखिलभुवनजनतुष्टिकरमजनिष्ट।

गङ्गोदकेन च जिनद्व[5]यजन्मना च
प्राका[6]शि काशिनगरी न गरीयसी कैः।
तस्या इति व्यधित कल्पमनल्पभूतेः।
श्रीमान् जिनप्रभ इति प्रथितो मुनीन्द्रः॥

श्रीवाराणसीकल्पः॥ ग्रं० ११२। अ० २२॥

---

१ 'वाणार(राण)सी' B. २ 'द्वितीय(या ?)' B.
३ 'यवना(:)' A. ४ 'कल्याणि(णा ?)क' A.B.
५ 'जिनदय(म ?)जन्मना' A.B. ६ 'प्र(प्रा ?)काशि' A.B.

सिरिवीरस्स गणहरे इक्कारस अक्खमाइगुणे नमिउं ।
तेसिं चिअ कप्पलवं[1] भणामि समयाणुसारेण ॥ १ ॥

नामं ठाणं जणया जणणीओ अखरिक्खगुत्ताई ।
गिहिपरि[2]आओ संसयवयदिणपुरदेसकाला य ॥ २ ॥

वयपरिवारो छउमत्थकेवलित्तेसु वरिससंखा य ।
रूपं रिद्धी आउं सिव[3]ठाण तवुत्ति दाराई ॥ ३ ॥

तत्थ गणहराण नामाइं-इंदभूई, अग्गिभूई, वाउभूई, विअत्तो, सुहम्मसामी, मंडिओ, मोरिअपुत्तो, अकंपिओ, अच(य ?)लभाया, मेअज्जो, पभासो अ ।

इंदभू[4]ईप्पमुहा तिन्नि स[5]होअरा मगहदेसे गोव्वरगामे उप्पन्ना । विअत्तो सुहम्मो अ दोवि कोल्लागसंनि[6]वेसे । मंडिओ, मोरिअपुत्तो अ दोवि मोरिअसंनिवेसे । अकंपिओ मिहिलाए । अचलभाया कोसलाए । मेअज्जो वच्छदेसे तुंगिअ[7]संनिवेसे । पभासो रायगिहे ।

जणओ-तिण्हं सोअराणं वसुभूई, विअत्तस्स धणमित्तो, अज्जसुहम्मस्स धंमिल्लो, मंडिअस्स धणदेवो, मोरि[8]अ-

१ 'कल्प(प्प ?)लवम्' A

२ 'गिहपरिआउ(ओ ?)' A, 'गिहिपरियाओ ?)' B.

३ 'सिवठाणतवुत्तिदाराइ' B.

४ 'इंदभूई' A.B.

५ 'स[होअरा—' इत्यारभ्य 'संनिवेसे' इत्यन्तः पाठः A पुस्तके नास्ति।

६ 'संनिवेशे(से)' B.

७ 'उं(तुं ?)गिअसंनिवेशे(से)' B.

८ 'मोरिअपुत्तस्स मोरिओ अकंपिअस्स देवो' इति A पुस्तके नास्ति।

पुत्तस्स मोरिओ, अकंपिअस्स[1] देवो, अयलभाउणो वसू, मेअ[2]ज्जस्स दत्तो, पभासस्स बलो ।

जणणी-तिण्हं भाउआणं पुहवी । विअत्तस्स वा(वी?)-रुणी । सुहम्मस्स भद्दिला । मंडियस्स विजयदेवी । मोरिअपुत्तस्स सा चेव, जओ धणदेवे परलोअं गए मोरि-एण सा संगहिया[3], अविरो[4]हो अ तम्मि देसे । अकंपिअस्स जयंती । अयलभाउणो नंदा । मेअज्जस्स वरुणदेवा । पभासस्स अइभद्दत्ति ।

नक्खत्तं-इंदभूइणो जिट्ठा । अग्गिभूइणो कित्तिआ । वाउभू[5]इणो साई । विअत्तस्स सवणो । सुहम्मसामिणो उत्तर[6]फग्गुणीओ । मंडिअस्स महाओ । मोरिअपुत्तस्स मिगसिरं । अकंपिअस्स उत्तरासाढा । अयलभाउणो मिगसिरं । मेअज(ज्ज?)स्स[7] अस्सिणी । पभासस्स पूसुत्ति ।

तिण्णि भाउणो गोअ[8]मगुत्ता । विअत्तो भारद्दाय-सगुत्तो । सुहम्मो अग्गिवेसायणसगुत्तो । मंडिओ वासिट्ठसगुत्तो । मोरिअपुत्तो कासवगुत्तो । अकंपिओ गोअमसगुत्तो । अयलभाया हारिअसगुत्तो । मेअज्जो पभासो अ कोडिन्नसगुत्तुत्ति ।

---

१ 'अकंपिअस्स' B. २ 'मेअज्जस्स [दत्तो ?] पभासस्स ब...' B.

३ 'गहिआ' B. ४ 'अवरोहो' A., 'अविराहो' B.

५ 'वाइ(उ ?) भूय(इ ?)णो' A. B.

६ 'उत्तरफग्गु(ग्गु ?)णीओ' A. ७ 'मेअज्ज(ज ?)स्स' B.

८ 'गोअमगु(गु ?)त्ता' B.

गिहत्थपरिआओ-इंदभूइणो पंचासं वासाइं। अग्गिभूइस्स बायालीसं[1]। विअत्तस्स पन्नासं। सुहम्मसामिस्स वि पन्नासं। मंडिअस्स तेवन्ना। मोरि[2]अपुत्तस्स पणसट्ठी। अकंपिअस्स अडयालीसं। अयलभाउणो छायालीसं। मेअज्जस्स छत्तीसं। पभासस्स सोलसत्ति।

संसओ-इंदभूइस्स जस्स(?)जीवे। भगवया महावीरेणं छिन्नो। अग्गिभूइणो कम्मे। वाउभूइणोतज्जी[3]वे तस्सरीरे। विअत्तस्स पंचमहाभूएसु। सुह[4]म्मसामिणो जो जारिसो इह भवे परभवे वि सो तारिसो चेव त्ति। मंडियस्स बंधमुक्खेसु मोरिय(अ?)पुत्तस्स देवेसु। अकंपिअस्स नरएसु। अयलभाउणो पु[5]ण्णपावेसु। मेअज्जस्स परलोए। पभासस्स निव्वाणेत्ति।

दिक्खागहणमिक्कार[6]सण्हं पि देवाणमागमणं दट्ठूण जन्न वाडयाओ उवट्ठिआणं वइसाहसुद्धइक्कारसीए मज्झिमपावाए नयरीए महासेण[7]वणुज्जाने पुव्वण्हदेसकालेत्ति।

इंदभूइ(ई?)पमुहाणं पंचण्हं पंचराया खंडिया सह निक्खंता। मंडिअमोरिअपुत्ताणं पत्तेअं सट्ठा तिन्निसया। अकंपिआईणं चउण्हं पत्तेअं तिन्निसयत्ति।

---

१ 'वाउभूयस्स बायालीसं' इत्यधिकं A. पुस्तके।

२ मोरिअस्स A.

३ तज्जीवे A.

४ 'सुहंस(हम्म)' B.

५ 'पुंन(पुण्ण)' A. B.

६ 'इक्कारसह्न(सण्हं?)पि' A. B.

७ 'महास(से?)ण' A.

छउमत्थ प[1]रिआओ-इंदभूइस्स तीसं वासाइं, अग्गि-भूइस्स दुवा[2]लस, वाउभूइस्स दस, विअत्तस्स दुवालस, सुहम्मस्स बायालीसं, मंडिअमोरिअपुत्ताणं पत्ते[3]यं चउद्दस, अकंपिअस्स नव, अयलभाउणो दुवालस, मेअज्जस्स दस, पभासस्स अट्ठि(ट्ठ?)त्ति ।

केवलिविहारेणं इंद[4]भूई दुवालसवासाइं विहरिओ । अग्गिभूई सोलस, वाउभूई विअत्तो अ पत्तेअं अट्ठारस, अज्जसुहम्मस्स अट्ठ, मंडिअमोरिअपुत्ताणं पत्तेअं सोलस, अकंपिअस्स एगवीसं, अयलभाउणो चउद्दस, मेअज्जस्स पभासस्स य पत्तेअं सोलसत्ति ।

इक्कारसण्ह वि वज्जरिसहनारायं संघयणं, समचउरसं संठाणं, कणगप्पहो देहवण्णो । रूवसंपया पुण तेसिं एवंतित्थयराणं ।

"सव्वसुरा जइ रूवं अंगुट्ठपमाण[5]यं विउवि(व्वि ?)ज्जा ।
जिणपायंगुट्ठं पइ न सोहए तं जहिंगालो ॥ १ ॥ [त्ति]"

वयणाओ अप्पडि[6]रूवं रूवं । तओ किंचूणं गणहराणं । तत्तो वि हीणं आहारगसरीरस्स । तत्तो वि अणुत्तरसुराणं । तत्तो जहक्कमं[7] नवमगेविज्जगपज्जवसाणदेवाणं हीणयरं । तत्तो वि कमेण अच्चुआइसोहम्मन्तदेवाणं हीण[8]यरं । तत्तो वि भवण-वईणं, तत्तो वि जोइसिआणं, तत्तो वि वंतरदेवाणं, तत्तो वि

---

१ 'परिआओ' B. २ 'दुवालस्स(स ?)' A.
३ 'पत्तेय(यं ?)' A; 'पत्तेअं' B. ४ 'इंदु(द ?)भूइ' B.
५ 'प्प(प ?)माणयं' A. ६ 'अप्पडि रूपं(वं ?) रूपं(वं ?)' A.
७ 'जहक(क्क ?)मं ?' A. ८ 'हीयण(हीण)यरं' A.

चक्कवट्टीणं हीणयरं। तत्तो वि अद्धचक्कवट्टीणं, तत्तो वि बलदेवाणं हीणयरं, तत्तो वि सेसजणाणं छट्ठाणवडिअं। एवं विसिट्ठं[1] रूवं गणहराणं।

सुअं पुण अगारवासे चउद्दस विज्जाठा[2]णाइं, सामण्णे पुण दुवालसंगं गणिपिड[3]गं सव्वेसिं। अओ, सव्वे वि दुवालसंग-प्पणेआरो।

लद्धीओ पुण सव्वेसिं गणहराण सव्वाओ वि हवंति। तं जहा-बुद्धिलद्धी अट्ठारसविहा-केवलनाणं, ओहिनाणं, मणपज्ज-वनाणं, बीअबुद्धी, कुट्ठबुद्धी, पयाणुसारित्तं, संभिन्नसोइत्तं, दूरासा-यणसामत्थं, दूरफरिसणसामत्थं, दूरदरिसणसामत्थं, दूराग्घाण-सामत्थं, दूरसवणसामत्थं दसपुव्वित्तं, चउद्दसपुव्वित्तं, अट्ठंगमहा-निमित्तं(त्त?)कोसल्लं, पण्णसवणत्तं, पत्तेअबुद्धत्तं, वायत्तं च।

किरिआविसया लद्धी दुविहा-चारणत्तं आग(गा ?)-सगा[4]मित्तं च।

वेउव्वि[5]अलद्धी अणेगवि[6]धा(हा) अणिमा, महिमा, लघिमा, गरिमा, पत्ती[7](ती), पक्कामित्तं, ईसित्तं, वसित्तं, अप्पडिघाओ, अंतद्धाणं, कामरूवित्तमिच्चाइ।

तवाइसयलद्धी सत्तविहा उग्गत[8]वत्तं, दित्ततवत्तं, महातवत्तं, घोरतवत्तं, घोरपरक्कमत्तं, घोरबंभयारित्तं, अघोरगुणबंभयारित्तं च।

---

१ 'विस(सि ?)ट्ठं' A. २ 'वा(ठा ?)णाइं' B.
३ 'पीड(पिड ?)ग' B. ४ 'अगासगामित्तं' B.
५ 'वेअ(उ)व्विअ' A. B. ६ 'अणेगविहा' A. B.
७ 'पत्ती(ती ?)' A. ८ 'उवगात(ग्गत)वत्तं' A.

वललद्धी तिविहा—मणोबलित्तं, वयणबलित्तं, काय-बलित्तं। ३।

ओसहिलद्धी अट्ठविहा—आमोसहिलद्धी, खेलोसहिलद्धी, जल्लोसहिलद्धी, मलोसहिलद्धी, विप्पोसहिलद्धी, सव्वोसहिलद्धी, आसगअविसत्तं दिट्ठिअविसत्तं। ८।

रसलद्धी छविहा—वयणविसत्तं दिट्ठिवि[1]सत्तं, खीरासवित्तं, मक्षासवित्तं, स(स)प्पि[2]रासवित्तं, अमिआसवित्तं।

खित्तलद्धी दुविहा पन्नत्ता। अक्खीणमहाणसत्तं, अक्खीण-महालयत्तं च। एआहिं लद्धीहिं संपन्ना सव्वे वि।

सव्वाउअं इंदभू[3]इस्स बाणउई संवच्छराइं। अग्गि[4]-भू(इ)स्स चउहत्तरी, वाउभूइस्स सत्तरी, विअत्तस्स असीई, अज्जसुहम्मस्स सयं, मंडिअस्स[5] तेआसीई मोरिअपुत्तस्स पंचनउई, अकंपिअस्स अट्ठहत्तरी, अयलभाउणो बाहत्तरी, मेअज्जस्स बासट्ठी, पहासस्स चालीसं ति।

निव्वाणं च सव्वेसिं पाउवगमणमासिअभत्तेण रायगिहे नगरे वेभारपव्वए संजायं। पढमपंचमवज्जा नवगणहरा जीवंते भयवंतम्मि वीरे मुक्खं पत्ता। इंदभूई अज्जसुहम्मो अ तेम्मि निव्वाणगए निव्वुअत्ति।

---

१ 'दिट्ठिविसत्तं' इति A पुस्तके नास्ति। २ 'सप्पि(सप्पि ?)रास-वित्तं' A. B. ३ 'इंदभूय(इ ?)स्स' B. ४ 'अग्गिभूय-(इ ?)स्स A. B. ५ 'मंडिय(अ ?)स्स' B.

गोअमसामिप्पभिई गणपडणो पवयणंबवणमऊ[1]णो ।
सुग[2]हीअनामधेया महोदयं मज्झ उवणिंतु ॥ १ ॥
जो गणहरकप्पमिणं पइपच्चू[3]सं पढे पसन्नमणो ।
करयलमहिवसइसया कल्लाणपरंपरा तस्स ॥ २ ॥
जिणपहसू[4]रीहिँ कओ गहवसुसिद्धिकुमिअ(१२८९)
विक्कमसमासु ।
जिट्ठसिअपंचमिबुहे गणहरकप्पो चिरं जयइ ॥ ३ ॥

इति श्रीमहावीरगणधरकल्पः ॥ ग्रं. ६८ ॥

---

१ 'मइ(ऊ ?)णो' B.

२ 'सुगहि(ही ?)अ' A.B.

३ 'पइप...सं' B.

४ 'सूरीहिं(हिँ)' A.B.

नमिऊण पासनाहं पउमावइनागरायकयसेवं।
कोकावसहीपासस्स किं पि वत्तव्वयं भणिमो ॥ १ ॥

सिरिपराहवाहणकुलसंभूओ हरि[1]सउरीयगच्छा[2]लंकारभूसिओ अभयदेवसूरी हरिस[3]उराओ एगया गामाणुगामं विहरंतो सिरिअणहिल्लवाडयपट्टणमागओ। ठिओ बाहिं पएसे सपरिवारो। अन्नया सिरिजयसिंहदेवनरिंदेण गयखंधारूढेण रायवाडिआगएण दिट्ठो मलमलिणवत्थदेहो। रायणा गयखंधाओ [4]उअरिऊण वंदिऊण दुक्करका[5]रउत्ति दिन्नं मलधारित्ति नामं। अब्भत्थिऊण नयरमज्झे नीओ रन्ना। दिन्नो उवस्सयो घयवसहि(ही?)समीवे। तत्थ ठिआ सूरिणो। तस्स पट्टे कालक्कमेण अणेगगंथनिम्माणविक्खायकित्ती सिरिहेमचंदसूरी संजाओ। ते अ पइदिअहं वासारत्तचउम्मासीए घयवसहीए गंतूण वक्खाणं करिंति। अन्नया कस्स वि घयवस[6]हीए गुट्ठि[7]अस्स [8]पिउकज्जे बलिवित्थाराइकरणं घयवसहीचेइए आढत्तं। तओ वक्खाणकरणत्थमागया सिरिहेमचंदसूरी। पडिसिद्धा गुट्ठिएहिं जहा—अज्ज वक्खाणं इत्थ [9]न कायव्वं। इत्थ बलिमंडणाइणा नत्थि ओगासो। तओ सूरीहिं भणिअं थो[10]वमेव अज्ज वक्खाणिस्सामो मा चउमासीवक्खाण—

---

१ 'हरिसओ(उ?)रीय' A.B. २ 'गछा(च्छा?)' B.
३ 'हरिसओ(उ?)' A.B. ४ 'ओ(उ?)अरिऊण' B.
५ 'कारिओ(उ?)त्ति' B. ६ 'चि(च?)य' A.B.
७ 'गुट्ठियस्स' A.B. ८ 'पिओ(उ?)' A.B.
९ 'न व (च?)' A. १० '...वमेव' B.

[१]विच्छेओ भविस्सइत्ति। तं च न पडिवन्नं गुट्ठिएहिं। तओ अमरिसविलक्खमाणसा पडिआगया उ[२]वस्सयमायरिआ। तओ दूमिअचित्ते गुरुणो नाऊण सोवन्निअमोखदेव [३]नायगनामगेहिं सट्ठेहिं मा अन्नया वि परचेइए एवंविहो अवमाणो होउ त्ति घयवसहीसमीवे चेइ[४]अकारावणत्थं भू[५]मी मग्गिया, न य कत्थ वि लद्धा। तओ कोकओ नाम सिट्ठी भूमिं मग्गिओ। वारिओ अ सो घयवसहीगुट्ठिएहिं तिउ[६]णदमदाणइच्छणेण। तओ ससंघा आगया सूरिणो कोकयस्स घरं। तेण वि पडिवत्तिं काऊण भणिअं—'दिन्ना मए भूमी जहोचिअमुल्लेण, परं मज्झ नामेणं चेइअं कारेअव्वं।' तओ सूरिहिं सावएहिं अ [७]तहत्ति पडिवन्नं। तत्थ य घयवसहीआसन्नं कारिअं चेइअं कोकावसहि त्ति। ठाविओ तत्थ सिरिपासनाहो पूइज्जए तिक्कालं।

कालक्कमेण सिरिभीमदेवरज्जे पट्टणं भंजंतेण मालवरन्ना [८]सा पासनाहपडिमा वि भग्गा। तओ सोवन्निअनायग-संताणुप्पन्नेहिं रामदेवआसाधरसिट्ठीहिं उद्धारो कारेउ-माढत्तो। आरासणाओ फलहीतिगं आणीअं, न य तं निद्दोसं तओ बिंबतिगे वि घडिए न परितोसो संजाओ गुरूणं सावयाणं

१ 'विछे(च्छे ?)ओ' B.
२ 'ओ(उ ?)वस्सय' B.
३ 'नारायगं(?)' A. 'नायगं'।
४ 'चेइ[अ]' B.
५ 'भूमी मागया' A.
६ 'तिओ(उ ?)ण' B.
७ 'तहि(ह ?)त्ति' A.
८ 'सो(सा ?)' A.

य । तश्रो रामदेवेण[1] अभिग्गहो गहिश्रो । जहाहं अकाराविश्र पासमामिबिंबं न भुंजामित्ति । गुरुणो वि उववासे कुणंति य्ह । तश्रो अट्ठमोववासे रामदेवस्स देवादेसो जाश्रो । जहा– जत्थ गोहलिश्रा स[2]पुप्फक्खया दीसइ, तस्स हिट्ठा, इत्थेव चेइअपरि[3]सरे हत्तिएहिं हत्थेहिं फलही चिट्ठइ त्ति । खणिऊण लद्धा फलही । कारिश्रं निरुवमरूवं-पासनाहबिंबं । बारससयछासट्ठे [१२६६ वि० सं०- 1209 A.D.] विक्कमसंवच्छरे देवाणंदसूरीहिं पइट्ठिश्रं ठाविश्रं च चेइए पसिद्धं च कोकापासनाहुत्ति । रामदेवस्स पुत्ता तिहुणा जाजा नामाणो । तिहुणागस्स पुत्तो मल्लश्रो । तस्स पुत्ता देल्हणजइतसोहनामधेया । ते श्र पूश्रंति पइदिणं पासनाहं ।

अन्नया देल्हणस्स सिरिसंखेसरपासनाहेण सुमिणयं दिन्नं । जहा—पहाए घडिश्राचउक्कं जाव अहं कोकापासनाहपडिमाए सन्निहिस्सामि । तम्मि घडिश्राचउक्के एअम्मि बिंबे पूइए किर अहं पूइउत्ति । तहेव लोगेहिं पूइज्जमाणो कोकापासनाहो पूरेइ संखेसरपासनाहु व्व पच्चए । संखेसरपासनाहविसया पूआजत्ताइ[4] अभिग्गहा तत्थे व पु[5]ज्जंति जणाणं । एवं सन्निहिश्रपाडिहेरो जाश्रो भयवं

---

१ 'रामदेवेन' A.B. २ 'स पुष्प(प्प ?)' B.

३ परिसरोऽत्ति(रेहत्ति ?)एहिं । ४ 'पूज्या (जा ?)' A.B.

५ 'पुज्ज(ज्जं ?)ति' B.

कोकयपासनाहो तित्तीसपव्वपमाणमुत्ती मलधारिगच्छ-पडिबद्धो ।

अणहिल्लपट्टणमंडणसिरिकोकावस[1]हिपासनाहस्स ।
इअ एस कप्पलेसो होउ जणाणं धुअकिलेसो ॥

इति को[2]कापार्श्वनाथकल्पः समाप्तः ॥ ग्रं० ४०॥

---

१ 'वसहिं (हि ?)' A.B.   २ 'श्रीकोकापार्श्वनाथकल्पः' B.

नमिअ जिणे उवजीविअ वक्काइं पुव्वपुरिससीहाणं।
कोडिसिलाए कप्पं जिण[1]पहसूरी पयासेइ ॥ १ ॥
इह भरहखित्तमज्झे तित्थं मगहासु अत्थि[2]
कोडिसिला।
अज्ज वि जं पूइज्जइ चारणसुरअसुरजक्खेहिं ॥ २ ॥
भरहद्धवासिणीहिं अहि[3]ट्ठिआ देवयाहिं जा सययं।
जोअणमेगं पिहुला जोअणमेगं च उस्सेहो ॥ ३ ॥
तिक्खंडपुहविपइणो निअं परिक्खंति बाहु[4]बलमखिला।
उप्पाडिअ जं हरिणो सुरनरखयराण पच्चक्खं ॥ ४ ॥
पढमेण कया छत्तं बीएणं पाविआ सिरं जाव।
तइएणं गीवाए तओ चउत्थेण वच्छ[5]य(थ ?)ले ॥ ५ ॥
उअरंतं पंचमएण तइय छट्ठेण कडि[6]अडं नीआ।
उ(ऊ ?)रुपज्जंते सत्तमेण[7] उप्पाडिआ हरिणा ॥ ६ ॥
जाणूसु अट्ठमेणं नीआ चउरंगुलं तु भूमीओ।
उद्धरिआ चरमेणं कण्हेणं वामबाहाए ॥ ७ ॥
अवसप्पिणिकालवसा कमेण हायंति माणवबलाइं।
तित्थयराणं तु बलं सव्वेसिं होइ इगरूवं ॥ ८ ॥

---

१ 'जिणप्प(प ?)ह' A. २ 'अत्थ(त्थि ?)' A.
३ 'अहिट्ठिअ (आ ?)' A.B. ४ 'बाहुबलि(ल ?)' A.
५ 'वछ(च्छ ?)यले' B. ६ 'कडिअं (अ ?) [डं]' B.
७ 'सत्तमेण' B.

उप्पाडेउं तीरइ जं बलवंतीए[1] सुहडकोडीए ।
तेणे सा कोडिसिला दुक्कलेणा[2] वि हरिणा[3] उ ॥ ९ ॥

चक्काउ[4] होत्ति नामेण संतिनाहस्स गणहरो पढमो ।
काऊण अणसणविहिं[5] कोडिसिलाए सिवं पत्तो ॥ १० ॥

सिरिसंतिनाहतित्थे[6] संखिज्जाओ मुणीण कोडीओ ।
इत्थेव य सिद्धाओ[7] एवं सिरिकुंथुतित्थे वि ॥ ११ ॥

अरजिणवरतित्थम्मि वि बारस सिद्धाउ समणकोडीओ ।
छक्कोडीउ[8] रिसीणं सिद्धाओ मल्लिजिणतित्थे ॥ १२ ॥

मुणिसुव्वयजिणतित्थे सिद्धाओ तिन्नि साहुकोडीओ ।
इक्का कोडी[9] सिद्धा नमिजिणतित्थेऽणगाराणं ॥ १३ ॥

अन्ने वि अणेगे तत्थ महा[10]रिसी सासयं पयं पत्ता ।
इह कोडिसिलातित्थं विक्खायं पुहविवलयम्मि ॥ १४ ॥

पुव्वायरिएहिं च इत्थ सविसेसं किं वि भणिअं तं जहा—

[11]जोअणपिहुलायामा दसन्नपव्वयसमीवि कोडिसिला ।
जिणछक्कतित्थसिद्धा तत्थ अणेगाउ मुणिकोडी ॥ १५ ॥

---

१ 'बलव(वं ?)तीए' A.B. २ 'इक्काले(ह्ले ?)णावि' B.
३ 'हरिणाओ(उ ?)' A.B. ४ 'चक्काओ(उ ?)' A.B.
५ 'व(वि ?)हिं' A.B. ६ 'सिरिसि(?)संति' A.
७ 'सिद्धाओ (उ ?)' B. ८ 'छकोडि(कोडी ?)उ' A., 'छको (को ?)डीओ (उ ?)' B. ९ 'कोडा (डी ?)' A.
१० 'मह(हा ?)रिसी' A. 'महि(हा ?)रिसी' B.
११ गाथाया अस्या A. पुस्तके क्रमगणनायां षोडशसंख्योल्लिखिता प्रायोऽवतरणिकाख्यं गद्यमपि परिगणितं भवेत् ।

[1]पढमं संतिगणहरो चक्का[2]उहोऽणेगसाहुपरियरि-
(वरि ?)ओ[3]।

छत्तीसजुगेहिं तओ सिध्धा[4] (द्धा ?) संखिज्जमुणिकोणी[5]
(डी ?) ॥ १६ ॥

संखिज्जा मुणिकोडी अडवीसजुगेहिं कुंथुनाहस्स।
अरजिणचउवीसजुगा बा[6]रसकोडीउ सिद्धाओ ॥ १७ ॥

मल्लिस्स वि वीसजुगा छकोडि मुणिसुव्वयस्स
कोडितिगं।

नमितित्थे इगकोडी सिद्धा तेण[7]स कोडिसिला ॥ १८ ॥

छत्ते सिरम्मि गीवा वच्छे[8]उअरे कडीइ ऊरूसु।
जाणू कहमवि जाणू नीया सा वासुदेवेण ॥ १९ ॥

इअ कोडिसिलातित्थं तिहुअणजणजणिअनिव्वुआवत्थं।
सुरनरखेअरमहिअं भविआणं कुणउ कल्लाणं ॥ २० ॥

[इति ?] श्रीकोटिशिलातीर्थकल्पः ॥

ग्रं. २४[9]। अ. ६ ॥

---

१ इयं गाथा A. पुस्तके नास्त्येव। २ 'चक्काओ(उ ?)' B.
३ 'परिअरिओ' B. ४ 'निद्धा' B. ५ 'कोडी' इति B. पुस्तके।
६ 'बारसकोडीओ(उ ?)' A.B. ७ 'तेणसा (णेसा ?)' B.
८ 'वच्छेओ(उ ?)' A., 'वछेओ (च्छेउ ?)' B.
९ A.B. पुस्तकयोर्ग्रन्थसंख्या तु तुल्यैव। परम् A. पुस्तके षोडशी गाथा नास्त्येव। अथोभयोरपि क्रमगणना त्रयोदशीं गाथां यावदविच्छिन्ना। अग्रे च A. पुस्तके पञ्चदश्यां षोडशसंख्या निर्दिष्टा, B. पुस्तके तु पञ्चदश। चतुर्दशसंख्यातूभयोरेव नास्ति।

श्रीवस्तुपालतेजःपालौ मन्त्रीश्वरावुभावास्ताम् ।
यौ भ्रातरौ प्रसिद्धौ कीर्तनसंख्यां तयोर्ब्रूमः ॥ १ ॥

पूर्वं गुर्जरधरित्रीमण्डनायां मण्डलीमहानगर्यां श्रीवस्तुपालतेजःपालाद्या वसन्ति स्म। अन्यदा श्रीमत्पत्तनवास्तव्यप्राग्वाटान्वयठक्कुरश्रीचन्द्रपात्मजठक्कुरश्रीचण्डप्रसादाङ्गजमन्त्रिश्रीसोमकुलावतंसठक्कुरश्रीआसराजनन्दनौ कुमारदेवीकुक्षिसरोवरराजहंसौ श्रीवस्तुपालतेजःपालौ श्रीशत्रुञ्जयगिरिनारादितीर्थयात्रायै प्रस्थितौ। हडालाग्रामं गत्वा यावत् स्वां विभूतिं चिन्तयतस्तावल्लक्षत्रयं सर्वस्वं जातम् । ततः सुराष्ट्रास्वसौस्थ्यमाकलय्य लक्षमेकमवन्यां निधातुं निशीथे महाश्वत्थतलं खानयामासतुः। तयोः खानयतोः कस्यापि प्रा[१]क्तन[:] कनकपूर्णः शौल्वकलशो निरगात्। तमादाय श्रीवस्तुपालस्तेजःपालजायामनुपमादेवीं मान्यतयाप्राच्छत्—क्वैतन्निधीयत इति। तयोक्तं गिरिशिखर एवैतदुच्चैः स्था[२]प्यते यथा प्रस्तुतनिधिवन्नान्यसाद्भवति। तच्छ्रुत्वा श्रीवस्तुपालस्तद्द्रव्यं श्रीशत्रुञ्जयोज्जयन्तादावव्ययत्। कृतयात्रो व्यावृत्तो धव[३]लक्कपुरमगात्।

अत्रान्तरे मह्णादेवी नाम कन्यकुब्जेश्वरसुता जनकात् कंचुलिकापदे गुर्जरधरित्रीमवाप्य तदा[४]धिपत्यं भुक्त्वा मृता सती

---

१ 'प्राक्तन·' B.
२ 'स्थाप्यां(प्य ?)ते' A.B.
३ 'धवलक्कापुरम्' B.
४ 'तवा(दा ?)धिपत्यम्' B.

तत्रैव देशाधिष्ठात्री देवता[1] समजनि । सैकदा स्वप्ने वीर-धवलनृपस्याचीकथत्—यद्वस्तुपालतेजःपालौ राज्यचिन्तक-प्रायहरौ विधाय सुखेन राज्यं शाधि । इत्थं कृते राज्यराष्ट्रवृद्धि-स्तव भवित्रीत्यादिश्य स्वं च प्रकाश्य तिरोदधे देवी । प्रातरुत्थाय नृपतिर्वस्तुपालतेजःपालावाहूय सत्कृत्य च ज्यायसः स्तम्भ-तीर्थधवलक्कयोराधिपत्यमदात् । तेजःपालस्य तु सर्वराज्य-व्यापारमुद्रां ददौ । ततस्तौ षड्[2]दर्शनदाननानाविधधर्मस्थान-विधापनादिभिः सुकृतशतानि चिन्वन्तौ निन्यतुः समयम् ।

तथा हि—लक्षमेकं सपादं जिनबिम्बानां कारितम् । अष्टादश कोटयः षण्णवतिर्लक्षाः श्रीशत्रुञ्जयतीर्थे द्रविणं व्ययितम् । द्वा[3]दश कोटयोऽशीतिर्लक्षा[4] श्रीउज्जयन्ते, द्वादशकोट्यस्त्रिपञ्चा-शत् लक्षा अर्बुदशिखरे लूणिगवसत्याम् । नवशतानि चतु-रशीतिश्च पौषधशालाः कारिताः, पञ्चशतानि दन्तमयसिंहा-सनानाम्, पञ्च[5]शतानि पञ्चोत्तराणि समवसरणानां जादरमया-नाम् । ब्रह्मशालाः सप्तशतानि, सप्तशतानि स[6]त्राका(गा)राणाम्,

---

१ 'जनकात् कञ्चुलिकापदे गुर्जरधरित्रीमवाप्य तदाधिपत्यं भुक्त्वा मृता सती तत्रैव देशाधिष्ठात्री देवता' इति A. पुस्तके लेखकप्रमादाद्द्विर्लिखितं वर्तते ।

२ 'षट्(ड् ?)दर्शनदान' A.B.

३ 'द्वादशकोटयोऽशीतिर्लक्षाः श्रीउज्जयन्ते' इति A. पुस्तके नास्ति । ४ 'अशीतिल(र्ल ?)क्षाः' B.

५ 'पञ्चशतानि दन्त (?) पञ्चोत्तराणि' B.

६ 'सत्राका(गा ?)राणाम्' A.B.

सप्तशती तप[१]स्विकाकापालिकमठानाम्। सर्वेषां भोजननिर्वापादि-दानं कृतम्। त्रिंशच्छतानि युत्तराणि माहेश्वरायतनानाम्, त्रयोदशशतानि चतुरुत्तराणि शिखरबद्धजैनप्रासादानाम्, त्रयो[२]-विंशतिशतानि जीर्णचैत्योद्धाराणाम्। अष्टादशकोटिसुवर्णव्ययेन सर[३]स्वतीभाण्डागाराणां स्थानत्रये भरणं कृतम्। पञ्चशती ब्राह्मणानां नित्यं वेदपाठं करोति स्म। वर्षमध्ये संघपूजा-त्रितयम्। पञ्चदशशती श्रमणानां गृहे नित्यं विह[४]रति स्म। तटिककार्पटिकानां सहस्रं साधिकं प्रत्यहमभुङ्क्त। त्रयोदश तीर्थ-यात्राः संघपतीभूय कृताः। तत्र प्रथमयात्रायां चत्वारि सहस्राणि पञ्चशतानि शकटानां सशय्यापालकानां, सप्तशती सुखासनानां, [५]अष्टादशशती वाहिनीनां, एकाश्वविंशतिः शतानि श्रीकरीणां एकविंशतिः शतानि[६] श्वेताम्बराणाम्, एकादशशती दिगम्बराणां, चत्वारि शतानि सार्द्धानि जैनगायनानां, त्रयस्त्रिंशच्छती बन्दि-जनानां, चतुरशीतिस्तडागाः सुबद्धाः, चतुःशती चतुःषष्ठ्यधिका वापीनां, पाषाणमयानि त्रिंशद्द्वात्रिंशद्दुर्गाणि, दन्तमयजैनरथानां चतुर्विंशतिः, विंशं शतं शाक[७]घटितानां, स[८]रस्वतीकण्ठाभरणादीनि

---

१ 'तपस्वि(स्वि ?)' A.

२ 'त्रयोविंशतिः (ति ?)शतानि चैत्योद्धाराणाम्' B.

३ 'सरस्व(स्व ?)ती' A.

४ 'विहरं(र ?)ति' स्म B.

५ 'अष्टादशशता(ती ?)' A.

६ लेखकप्रमादात् A. पुस्तके 'वाहिनीनां। एकाश्वविंशतिः शतानि श्रीकराणां। एकविंशति शतानि' इति द्विर्लिखितमास्ते।

७ 'शाकघटिकाततानां (तानाम् ?)' B.

८ 'सरस्वतीकण्ठाभरणानि' B.

चतुर्विंशतिर्विंहारानि श्रीवस्तुपालस्य । चतुःषष्टिर्मसीतयः कारिताः । दक्षिणस्यां श्रीपर्वतं यावत्, पश्चिमायां प्रभासं यावत्, [1]उत्तरस्यां केदारं यावत्, पूर्वस्यां वाराण[2]सीं यावत् तयोः कीर्तनानि । सर्वाग्रेण त्रीणि कोटिशतानि चतुर्दशलक्षा अष्टादश सहस्राणि अष्टशतानि लौष्टिकचितयोनानि द्रव्यव्ययः । त्रिषष्टिवारान् संग्रामे जैत्रपत्रं गृहीतम् । अष्टादश वर्षाणि तयोर्व्यापृतिः ।

एवं तयोः पुण्यकृत्यानि कुर्वतोः[3] कियतापि कालेन श्रीवीर-धवलनृपः कालधर्ममयात्[4] । ततस्तत्पदे तदीयस्तनयः श्रीमान् वीसलदेवस्ताभ्यां मन्त्रिप्रवराभ्यां राज्येऽभिषिक्तः । सोऽपि समर्थः सन् क्रमेण दुर्मदः सचिवान्तरं विधाय मन्त्रितेजःपालमपा-चकार[5] । तदवलोक्य राज्ञः पुरोधाः सोमेश्वरनामा महाक[6]विर्नृपमुद्दिश्य साक्षेपं नव्यं काव्यम[7]पठत्—

यथा—

मासान् मांसलपाटलापरिमलव्यालोलरोलम्बतः
प्राप्य प्रौढिमिमां समीर महतीं पश्य त्वया यत् कृतम् ।
सूर्याचन्द्रमसौ निरस्त[8]मसौ दूरं तिरस्कृत्य यत्
पादस्पर्शसहं विहायसि रजः स्थाने तयोः स्थापितम् ॥

इत्यादि ।

---

१ 'उत्तरस्यां केदारं यावत्' इति B. पुस्तके नास्ति ।
२ 'वार(रा ?)णसीं' A, 'वाणारसीं' B.
३ 'कुर्वं(र्व)तोः' A.B. ४ 'कालधर्ममवा(या ?)त्' A.B.
५ 'अपाचकारः(र ?)' B. ६ 'महाकवि[ः]' A.
७ 'काव्यं (व्य)मपठत्' A. ८ 'निरस्त[त]मसौ' ।

तयोः पुरुषरत्नयोर्वृत्तप्रेपमादित उत्पत्तिस्वरूपं च लोक-प्रसिद्धित एवावगन्तव्यम् ।

गीताद्गायनवर्येण स्तू[1]डा(स्तवा ?)दिन्नाय कीर्तिता ।
कीर्तनानामियं संख्या श्रीमतो[2]र्मन्त्रिमुख्ययोः ॥

श्रीमहामात्यवस्तुपालतेजःपालकीर्तनसंख्याकल्पः[3] ।

यद्ध्यासितमर्हद्भिस्तद्धि तीर्थं प्रचक्षते ।
अर्हन्तश्च तयोश्चित्तमध्य[4]वात्सुरहर्निशम् ॥
तत्तीर्थरूपयोर्युक्त्या पुरुषश्रेष्ठयोस्तयोः ।
कीर्तनोत्कीर्तनेनापि न्याय्या[5] कल्पकृतिर्न किम् ॥
इत्यालोच्य हृदा कल्पलेशं मन्त्रीशयोस्तयोः ।
एतं विरचयांचक्रुः श्रीजिनप्रभसूरयः ॥

[इति श्रीमहामात्यवस्तुपालतेजःपालकीर्तनसंख्याकल्पः ।]

[6]ग्रं. ५२ अ. ६ ॥

---

१ 'स्तूडाद्(स्तवाद ?)' A.B.
२ 'श्रीमं(म)तोः' A.B.
३ अत्र B. पुस्तके 'ग्रंथ ५२ अ ५२' इति।
४ 'अध्यषी(वा ?)त्सु' B.
५ 'त्या(न्या ?)य्या' A.
६ अत्र च B. पुस्तके 'ग्रंथ ४ अ० ६ ॥' इति।

श्री[1]पार्श्वं चेल्लणाभिख्यं ध्यात्वा श्रीवीरमप्यथ।
कल्पं श्रीढिंपु[2]रीतीर्थस्याभिधास्ये यथाश्रुतम्॥ १॥
पारेतजनपदान्तश्चर्मण्वत्यास्तटे महानद्याः।
नानाघनवनगहना जयत्यसौ ढिंपुरीति पुरी॥ २॥

अत्रैव भारते वर्षे विमलयशा नाम भूपतिरभूत्। तस्य सुमङ्गलादेव्या सह विषय[3]सुखमनुभवतः क्रमाज्जातमपत्य-युगलम्। तत्र पुत्रः पु[4]ष्पचूलः पुष्पचूला पुत्री। अनर्थ-सार्थमुत्पादय[5]तः पुष्पचूलस्य कृतं लोकैर्वङ्कचूल इति नाम। महाजनोप(पा ?)लम्भेन राज्ञा रुषितेन[6] निस्सारितो नगराद्वङ्क-चूलः। गच्छंश्च पतितो भीषणायामटव्यां सह निजपरिजनेन स्वसा च स्नेहवशया। तत्र च क्षुत्पिपासार्दितो दृष्टो भिल्लैः। नीतः स्वपल्लीं स्थापितश्च पूर्वपल्लीपतिपदे पर्यपाल[7]यद्राज्यम्, अलुण्ठय-द्ग्रामनगरसार्थादीन्।

अन्यदा सुस्थिताचार्या अर्बुदाचलादष्टापदयात्रायै प्रस्थितास्तामेव सिंहगुहां नाम पल्लीं सगच्छाः प्रापुः। जातश्च वर्षाकालः। अजनि च पृथ्वी जीवाकुला। साधुभिः सहालोच्य मार्गयित्वा वङ्कचूलाद्वसतिं स्थितास्तत्रैव सूरयः। तेन च प्रथम-मेव व्यवस्था कृता—'मम सीमान्तर्धर्मकथा न कथनीया। यतो

१ 'श्रीपार्श्व(र्श्वं ?)चेल्लणाभिख्यं' B.
२ 'ढिंपुर(री ?)तीर्थस्य' B. ३ 'विषयसुखम्' A.B.
४ 'पुत्रः [पुष्पचूलः पुत्री]पुष्पचूला' A.
५ 'उत्पादयत्(तः ?)' A. ६ 'पु(?)रुषितेन' A.
७ '[पर्य ?]पालयद्राज्यम्' B.

युष्मत्कथायामहिंसादिको धर्मः। न चैवं मल्लोको निर्वहति।' एवमस्तु इति प्रतिपद्य तस्युरुपाश्रये गुरवः। तेन चाहूय सर्वे प्रधानपुरुषा भणिताः—'अ राजपुत्रस्तत्समीपे ब्राह्मणादय आगमिष्यन्ति[1] ततो भवद्भिर्जीववा(व ?)धो[2] मांसमद्यादिप्रसङ्गश्च पल्ल्या[3] मध्ये न कर्तव्यः। एवं कृते यति(ती ?)नाम[पि?] भक्तपानमजुगुप्सितं कल्पेत[4] इति। तैस्तथैव कृतं यावच्चतुरो मासान्। प्राप्तो विहारसमयः। अनुज्ञापितो वङ्कचूलः सूरिभिः 'समणाणं सउणाणम्, इत्यादिवाक्यैः। ततस्तैः सह चलितो, वङ्कचूलः। स्वसीमां प्रापुषा तेन विज्ञप्तं—'[5]वयं परकीयसीमायां न प्रविशाम इति। भणितः सूरिभिः—वयं सीमान्तरमुपेताः तत्किमप्युपदिशामस्तुभ्यम्। तेनोक्तं—यन्मयि निर्वहति तदुपदेशेनाऽनुगृह्यतामयं जनः। ततः सूरिभिश्चत्वारो नियमा दत्ताः तद्यथा—अज्ञातफलानि न भोक्तव्यानि, सप्ताष्टानि पदान्यपसृत्य घातो देयः, पट्टदेवी नाऽभिगन्तव्या, काकमांसं च न भक्षणीयमिति। प्रतिपन्नास्तेन ते। गुरून् प्रणम्य स स्वगृहानागमत्।

अन्यदा गतं सार्थस्योपरि धाट्या। शकुनकारणाच्चागतः सार्थः। त्रुटितं[6] च तस्य पथ्यदनम्। पीडिताः क्षुधा राजन्याः। दृष्टश्च तैः किंपाकतरुः फलितः। गृहीतानि फलानि। न जानन्ति ते तन्नामधेयमिति तेन न भुक्तानि। इतरैः सर्वैर्बुभुजिरे। मृताश्च

---

१ 'आगमिष्यति(न्ति ?)' A. २ 'जीववधो' A.B.

३ 'पल्ल्या (ल्ला ?)' A.B.

४ 'कल्प्यत इति' A. 'कल्प्यित इति' B.

५ 'विज्ञप्ति(प्तं ?)' A.B. ६ 'त्रुटिटं (तं ?)' A.B.

तैः किंपाकफलैः। ततश्चिन्तितं तेनाहो! नियमानां[1] फलम्। तत एकाक्येवागतः पल्लीम्, रजन्यां प्रविष्टः[2] स्वगृहम्। दृष्ट्वा[3] पुष्पचूला दीपालोकेन पुरुषवेषा निजपत्न्या सह प्रसुप्ता। जातस्तस्य कोपस्तयोरुपरि। द्वावप्येतौ खड्गप्रहारेण छिनद्मीति यावदचिन्तयत्तावत्स्मृतो नियमः। ततः सप्ताष्टपदान्यपक्रम्य घातं ददत् खाट्कृतमुपरि खड्गेन। व्याहृतं स्वसा 'जीवतु वङ्कचूल' इति। तद्वचः श्रुत्वा लज्जितोऽसावपृच्छत्किमेत[4]दिति। सापि नटवृत्तान्तमचीकथत्।

कालक्रमेण तस्य तद्राज्यं प्राप्तस्तत्रैव पल्ल्यां तस्यैवाचार्यस्य शिष्यौ धर्मऋषिधर्मदत्तनामानौ कदाचिद्वर्षारात्रमवास्थिषाताम्। तत्र तयोरेकः साधुस्त्रिमासक्षपणं विदधे। द्वितीय[5]श्चतुर्मासक्षपणम्। वङ्कचूलस्तु तद्दत्तनियमानामायतिशुभफलता-

---

१ 'निग्रह्णीयमानां (नियमानां ?)' B.

२ 'प्रविष्ट[ः]' B. ३ 'दृष्ट्वा(ष्ट्वा ?)' A.

४ 'अत्र B. पुस्तके लेखकप्रमादात् सप्तचत्वारिंशस्य पत्रस्यारम्भे षट्चत्वारिंशत्तमपत्रारम्भस्था इमाः पङ्क्तयः पूर्वकल्पस्था लिखिताः—'[शिखर-] बद्धजैनप्रासादानां। त्रयोविंशतानि चैत्यो द्धारणां। अष्टादशकोटिसुवर्णव्ययेन सरस्वतीभाण्डागाराणां स्थानत्रये भरणं कृतम्। पञ्चशती ब्राह्मणानां नित्यं वेदपाठं करोति स्म। वर्षमध्ये संघपूजात्रितयं पञ्चदशशती श्रमणानां गृहे नित्यं विहर(र)ति स्म। तटिककार्पटिकानां सहस्रं साधिकं प्रत्यहमभुङ्क्त। त्रयोदश तीर्थयात्राः संघपतीभूय कृताः। तत्र प्रथमयात्रायां चत्वारि—'।

५ 'द्वितीयच(श्च ?)तुर्मासक्षपणम्' A.

मवलोक्य व्यजिज्ञपत् । भदन्तौ ! मदनुकम्पया कमपि पेशलं धर्मोपदेशं दत्तम् । ततस्ताभ्यां चैत्यविधापनदेशना क्लेशनाशिनी विदधे। तेनापि श्राविकापर्वतसमीपवर्त्तिन्यां तस्यामेव [1]पल्ल्यां चर्मण्वती[2]सरित्तीरे कारितमुच्चैस्तरं चारुचैत्यं, स्थापितं तत्र श्रीमन्महावीरबिम्बम् । तीर्थतया च रूढं तत् । तत्र यान्ति स्म चतुर्दिग्भ्यः संघाः ।

कालान्तरे कश्चिन्नैगमः सभार्यः सर्वर्द्धा तद्यात्रायै प्रस्थितः । प्राप्तः क्रमेण रन्तिनदीम् । नावा[3](व ?)मारूढौ च दम्पती चैत्यशिखरं व्या(व्य ?)[4]लोकयताम् । ततः सरभसं सौवर्णकच्चोलके कुङ्कुमचन्दन[5]कर्पूरं प्रक्षिप्य जलं[6] नेतुमारब्धवती नैगमगृहिणी । प्रमादान्निपतितं तदन्तर्जल[7]तलम् । (तं० ?) ततो भणितं वणिजा अहो ! इदं कच्चोलकं (तं०?) नैककोटिमूल्यरत्नखचितं राज्ञा ग्रहणकेऽर्पितमासीत् । ततो राज्ञः कथं छुटितव्यमिति । चिरं विषद्य वङ्कचूलस्य पल्लीपतेर्विज्ञापितं तत् । यथास्य राजकीयवस्तुनो विचितिः कार्यताम् । तेनापि धीवर आदिष्टस्तच्छो[8]धयितुं प्राविशद्रन्तिनदम् । विचिन्वता चान्तर्जलतलं दृष्टम् । दृष्टं तेन हिर[9]ण्मयरथस्थं जीवन्तस्वामिश्रीपार्श्वनाथ[10]बिम्बम् । यावत्

---

१ 'पल्ल्यां(ल्ल्यां)' B. २ 'चर्मन्य(ण्व ?)ती' A. B.
३ 'नावा(व ?)म्' A. B. ४ 'व्य(व्या ?)लोकयताम्' A.
५ 'कर्प्पूरं' A., 'कर्पूरं' B. ६ 'जले' B.
७ 'अन्तर्जलतलं तं(लं त ?)' A., 'निर्पतितं [त ?]दंतर्जलतं(त)लं तं(लं : त)' B.
८ 'तच्छो(च्छो ?)धयितुम्' B.
९ 'हरि(हिर ?)ण्मय' A. B. १० 'श्रीपार्श्वनाथबिम्ब[म्]' B.

पश्यति स्म स बिम्बस्य हृदये तत्कचोलकम्। धीवरेणोक्तं—धन्याविमौ दम्पती यद्भगवतो वक्षसि घुसृणचन्द्रचन्दनविलेपनार्हं स्थितमिदम्। ततो गृहीत्वा तदर्पितं नैगमस्य। तेनापि दत्तं तस्मै बहु द्रव्यम्। उक्तं च बिम्बस्वरूपं नाविकेन। ततो वङ्कचूलेन श्रद्धालुना तत्रैव प्रवेश्य निष्कासितं तद्बिम्बम्। कनकरथस्तु तत्रैव मुक्तः। निवेदितं हि स्वप्ने प्राग्भगवता नृपतेः, यत्र[1] क्षिप्ता सती पुष्पमाला गत्वा तिष्ठति तत्र बिम्बं शोध्यमिति। तदनुसारेण बिम्बमानीय समर्पितं राज्ञे वङ्कचूलाय। तेनापि स्थापितं श्रीवीरबिम्बस्य बहिर्मण्डपे यावत्किल नव्यं चैत्यमस्मै कारयामीत्यभिसन्धिमता। कारिते च चैत्यान्तरे यावत्तत्र स्थापनार्थमुत्थापयितुमारभन्ते[2] राजकीयाः पुरुषास्तावत्तद्बिम्बं नोत्तिष्ठति स्म। देवताधिष्ठानात्तत्रैव स्थितमद्यापि तत्रै(थै?)वास्ते। धीवरेण पुनर्विज्ञप्तः पल्लीपतिः—यत्तत्र देव! मया नद्यां प्रति(वि?)ष्टेन[3] बिम्बान्तरमपि दृष्टम्, तदपि बहिरानेतुमौचितीमञ्चति। पूजार्हं हि भवति। ततः पल्लीश्वरेण पृष्टा स्वपरिषत्। भो! आनीते कोऽप्यनयोर्बिम्बयोः संविधानकं केन खल्वेते नद्या[4](द्य?)न्तर्जलतले न्यस्ते इत्याकर्ण्यैकेन पुराविदा स्थविरेण विज्ञप्तम्—देव! एकस्मिन्नगरे पूर्वं[5] नृपतिरासीत्। स च परचक्रेण समुपेयुषा सार्द्धं योद्धुं सकलचमूसमूहसन्नहनेन गतः, तस्याग्रमहिषी च निजं सर्वस्वमेतच्च बिम्बद्वयं कनकरथस्थं विधाय जलदुर्गमिति कृत्वा चर्मण्वत्यां

१ 'यस्मात्र [यत्र ?] क्षिप्ता सनी(ती ?)' B.

२ 'आरभन्ते(न्त ?)' A. ३ 'प्रति(वि ?)ष्टेन' A. B.

४ 'नद्या(द्य ?)न्तर्जले' B. ५ 'पूर्वन्नृपतिरासीत्' B.

कोटिम्बके प्रक्षिप्य स्थिता[१]। चिरं युद्ध्यतस्तस्य कोऽपि खलः किल वार्तामानैषीत्—यदयं नृपतिस्तेन परचक्राधिपतिनृपतिना व्यापादित इति। तत् श्रुत्वा देवी तत्कोटिम्बकमाक्रम्यान्तर्जलतलं प्राक्षिपत्, स्वयं च परासुतामासदत्। स च नृपतिः परचक्रं निर्जित्य यावन्निजनगरमागमत्तावद्देव्याः प्राचीनं वृत्तमाकर्ण्य भवाद्विरक्तः पारमेश्वरीं दीक्षां कक्षीचक्रे। तच्चैकं बिम्बं देवेन बहिरानीतं पूज्यमानं चास्ति। द्वितीयमपि चेन्निःसरति तदोपक्रम्यतामिति। तदाकर्ण्य वङ्कचूलः परमार्हत[२]चूला(डा ?)मणिस्तमेव धीवरं[३] तदानयनाय नद्यां प्रावीविशत्। स च तद्बिम्बं कटीदघ्न[४]वपुर्जल-तलेऽवतिष्ठमानं बहि[:]स्थग्रीवाङ्कं चावलोक्य निष्कासनो[५]पायाननेकानकार्षीत्। न च तन्निर्गतमिति दैवतप्रभावमाकलय्य समागत्य च विस्मापयत्र न्यवेदयत्तत्स्वरूपम्। अद्यापि तत् किल तथैवास्ते। श्रूयतेऽद्यापि केनापि धीवरस्थविरेण नौकालग्ने जाते तत्कारणं विचिन्वता तस्य हिरण्मयरथस्य कीलिका लब्धा। तां कनकमयीं दृष्ट्वा लुब्धेन तेन व्यचिन्ति—यदिमं रथं क्रमात्सर्वं गृहीत्वा ऋद्धिमान् भविष्यामीति। ततश्च स रात्रौ निद्रां न लेभे। उक्तश्च केनाप्यदृष्ट-पुरुषेण—यदिमां तत्रैव विमुच्य[६] सुखं स्वेयाः, नो चेत्तस्य एव त्वां हनिष्यामीति। तेन भयार्तेन तत्रैव मुक्ता युगकीलिका इत्यादि। किं न संभाव्यते दैवताधिष्ठितेषु पदार्थेषु।

---

१ 'स्थितासी(स्थिता ?)सीत्' B. २ 'परमार्हतः' B.

३ 'धी[व ?]रं' B. ४ 'दग्ध(घ्न ?)' A.

५ 'निष्कासनोपायाननेका[न ?]कार्षीत्' B.

६ 'विमुच्य [सुखं ?] स्वेयाः' B.

